ଓଡ଼ିଶା ରାଜ୍ୟ ମୁକ୍ତ ବିଶ୍ୱବିଦ୍ୟାଳୟ, ସମ୍ବଲପୁର, ଓଡ଼ିଶା
Odisha State Open University, Sambalpur, Odisha
Established by an Act of Government of Odisha.

# Master of Arts in Sanskrit (MASK)

## SK-02

## Grammar (Siddhanta-kaumudi)

# Block -02

## Regulating Injunction


UNIT- 1 PARIBHASA PRAKARANAM

UNIT-2 PARIBHASA PRAKARANAM

UNIT-3 PARIBHASA PRAKARANAM

UNIT-4 PARIBHASA PRAKARANAM

MASK PROGRAMME

## EXPERTS COMMITTEE

**Prof. Prafulla Kumar Mishra, Vice-Chancellor, North Odisha University**

**Prof. Raghunath Panda , Retd. Prof, Utkal University**

**Prof. Gopal Krishna Dash, Retd. Prof. , Utkal University**

**Dr. Madhusudan Mishra, Controller of Exams , Sri Jagannath Sanskrit University, Puri**

**Dr. Harmohan Mishra , Reader ( Retd.)**

**Dr. Kadambini Dash , Reader in Sanskrit, SB Women's College,**

**Dr. Debabrata Mohapatra , Sr . Lect. In Sanskrit, Emartidevi Women's College,Cuttack**

**Dr. Nibedita Pati, Lecturer in Sanskrit , S.B Women's College**

## CONVENOR

**Dr. Dillip Kumar Nayak , Reader in Odia ,**
**officer in charge, regional centre, B.J.B Auto. College Bhubaneswar**

## COURSE WRITER

**Prof. Gopal Krishna Dash , Utkal University , Bhubaneswar**

## PROGRAMME COORDINATOR

**Dr. Sareeta Pujari , Retd. Associate Professor in Sanskrit , Senior Academic Consultant,O.S.O.U**

**Mr. Pratap Kumar Meher , Academic Consultant , Sanskrit , O.S.O.U, Sambalpur**

## MATERIAL PRODUCTION

**Dr. Manas Ranjan Pujari**
**Registrar**
**Odisha State Open University, Sambalpur**

© OSOU, 2019. History of Vedic Literature *is* made available
under a Creative Commons Attribution-ShareAlike 4.0
http://creativecommons.org/licences/by-sa/4.0
Printed by :

## UNIT- i - iv   PARIBHASA PRAKARANAM

**विषयसुची**


### 1. Unit - 1

i) Introduction

ii) परिभाषा

सूत्ररुपा

सूत्रज्ञापिता

न्यायसिद्धा

वाचनिकी

III) सूत्राणि

सूत्रम् , वृत्तिः

व्याख्या (पदच्छेदः, अनुवृत्तिः, पदार्थोक्तिः, विग्रहः, वाक्ययोजना, पूर्वापरसमाधानम्, उदाहरणम्, प्रत्युदाहरणम् - इत्यादि समेता)

इको गुणवृद्धी, अचश्च

### 2. Unit - II - सूत्राणि

आद्यान्तौ टकितौ, मिदचोऽन्त्यात्परः, षष्ठी स्थानेयोगा, स्थानेऽन्तरतमः, तस्मिन्निति निर्दिष्टे पूर्वस्य

### 3. Unit - III -सूत्राणि

तस्मादित्युत्तरस्य, अलोऽन्त्यस्य, ङिच्च, आदेः परस्य, अनेकालशित् सर्वस्य

### 4. Unit - IV - सूत्रम्, परिभाषा च

स्वरितेनाधिकारः

परनित्यान्तरङ्गापवादानामुत्तरोत्तरं वलीयः (प.३९)

असिद्धं बहिरङ्गमन्तरङ्गे (प. ५१)

अकृतव्यूहाः पाणिनीयाः (प.५७)

### 5. सहायकग्रन्थसूची

### 6. आदर्शप्रश्नाः - Units I, II, III & IV

## UNIT - I
## Introduction

अथ परिभाषाप्रकरणम्

परिभाषा is an essential technical device of grammer. अनियये नियमकारिणी परिभाषा, परितो भष्यन्ते नियमा यया सा परिभाषा । परिभाषा is an instrument which is an aid for solving a proble. When an application of a rule needs a factor for support. A complementary rule plays a supportive role. Its domain is quite pervesive. Paribhasa is three fold, सुत्ररुया, सुत्रज्ञापिता and न्यायसिद्धा. They also have two ferms each, such as लिङ्गवती and विद्यङ्गशेषभूता । Paribhasa sutra occurring in a past is applicable to the entire sastra. It is लिङ्गवती परिभाषा. paribhasa applicable at the time of necessity is known as विद्याङ्गशेषभूता ।

**एकस्थाः सविता देवो यथा विश्वप्रकाशकः ।**
**तथा लिङ्गवती शास्त्रमे कस्याऽपि प्रदीपयेत् ।।**

parinians have acepted the maximum as यथाद्देशं संज्ञापरिभाषम् कर्मकालं संज्ञापरिभाषम् ।.Generally paribhasa in of four types. १. सुत्ररुपा, २. सुत्रमापिता, ३. न्यायसिद्धा, ४. वाचनिकी ।

सुत्ररुपा– Some aphorisms are cased as paribhasa rule षष्ठी स्थानेयोगा, अन्तादिवच्च, विप्रतिषेधे परं कार्यम् ।

ज्ञायकसिद्धा (सुत्रज्ञापिता) - व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् ।

न्यायसिद्धा - परिभाषा established by logic used by human behevious (लोकन्याय) गौणमुख्यमोः मुख्ये कार्यसम्प्रत्ययः ।

वाचनिकी - परिभाषा established by the authorities. Bhasyekara uses his own dictum such as अन्तरङ्गवहिरङ्गयो रन्तरङ्ग वलवत् । There are some paribhasa which are implied by the sutras. Another part of it in established by न्याय. For example, सति शिष्टस्वरवलीयस्त्मन्यत्र विकरणेभ्यः । First part of it is established by and the second part is implied by the sutra तास्यनुदात्ते... (6.1.186). The Vacaniki paribhasa were also added. When

no way is found for the accomplishment of a Sastriya injunction Then the paribhasa comes to rescue. Paribhasa is not the creation of single author. The sutras and the explanations have provided the scope for the application of paribhasa. The anceient वाजनिकी परिभाषाS were borrowed and used in the form of sutras.

Arcient Acanyas and commentators have taken resort to the paribhasa for claritication of particular sutra. काशकृत्स्न, व्याडि and पाणिनि are ancient Acaryas of the Paribhasa. The ancient paribhasas present before Panini were used by him as certain sutras. The Vacanika Paribhasas prevalent in the tradition were used by the author of the sutras. Vyadi and Paruni are the authentic Acareyas in the regard.

Yadhisthira Bimamisaka has called five types of Paribhasa reading. In the first type 93 paribhasas are collected. It begins with अर्थवद्ग्रहणे नानर्थकस्य ग्रहणाम् and ends with कृद्ग्रहणे गतिकारक, पुर्वस्यापि ग्रहराम् । In the second type 140 parbhasas are collected.

अर्थवद्ग्रहणे नानथकिस्य ग्रहणम् ... ज्ञायकसिद्धं न सर्वत्र । These are the first and last paribhasas respectively. The colophor contains that the paribhasas of Panini written by Vyadi is completed. The third type belong of Purusottamas Deva. 120 Paribhasas are collected in this book. It begins with अर्थविद्ग्रहणे - - and ends with भवति व्याख्यानतो विशेषप्रतिपत्ति नहिं सन्देहादलक्षपम् । The third one blongs to सीरदेव । It comprises 133 paribhasas. ज्ञायकसिद्धा and न्यायसिद्धा Paribhasas adorn this book. The fifth one is collected by Nagesabhatta in परिभाषेन्दशेस्वर । 133 paribhasas are mentioned as per the applicabilify in the prakniyas व्याख्यानतो - - is the first paribhasa and पदगौरवादृयोर्गतभागो गरीयान् is the last paribhasa. There are many commentaters. The paribhasa tradition has staengthered the grammatical application according to the need.

Bhattoji has calleted these Paribhasas for the application of Sandhi. These paribhasas have wider utility. They may be used for the formation of the words in Sandhi, dhata, kradanta taddhita and other sections. Sanjnasutras are not the parts of vidhi-sutras where as paribhasas are the parts of the Vidhisutra. Paribhasas auomplish the Vidhisutras by forming one sentence. The present chapter on the paribhasas will clarify the neture, scope, application and purpose of the paribhasas with reference to context.

अथ परिभाषाप्रकरणम्

**सि.कौ. (34) इको गुणवृद्धी (1.1.3) –**

गुणवृद्धिशब्दाश्यां यत्र गुणवृद्धी विधीयेते तत्र 'इक:' इति षष्ठ्यन्तं पदमुपतिष्ठते ।

**व्याख्या -** इक:, गुणवृद्धी । गुण: वृद्धि: इति अनुवृत्ति: । 'इक्' शब्दस्य षष्ठ्येकवचने इक: । अदेङ्गुण: (1.1.2), वृद्धिरादैच् (1.1.1) इति सुत्रद्वयात् गुणस्य वृद्धे:च अनुवृत्ति: । गुणवृद्दिशब्दाभ्याम् - ल्यब्लोपे पञ्चमी । गुणपदम् उच्चार्य वृद्धिपदम् उच्चाय एवम् अर्थ: संगत: भविष्यति । गुणवृद्धिभ्याम् इत्यत्र प्रयोज्यत्वार्थे तृतीयापि भविष्यति । सुत्रे गुणपदं वा वृद्धिपदम् उच्यार्य यत्र गुणकार्यं वा विधिकार्यं विधीयते तत्र 'इक:' इति षष्ठ्यन्तं पदं संगतं भवति । अर्थात् 'इक्' वर्णस्य गुण: वृद्धि: वा भवेत् । उपतिष्ठते-अंगच्छते संगतं भवति वा । स्थाधातु: परस्मैपदी, 'उपाददेवपुजासंगतिकरणमित्रकरणपथिषु' इति वार्तिकबलेन संगत्यर्थे आत्मनेपदम् । सुत्रे 'इक्' वर्णस्य इति ग्रहणात् आकारस्य, सन्ध्यक्षरस्य व्यञ्जनस्य च गुणकार्यं न भवति । यथा-याता, वाता-इत्यादिषु सार्वधातुकार्धधातुकयो: (2.3.84) इत्यनेन आकारस्य गुण: न भवति । तथैव स्न्ध्यक्षरस्य गुण: न भवति - ग्लै + अ + ति = ग्लायति । व्यञ्जनस्य अपि गुण: न यथा - उम्भिता, उम्भितुम् इत्यादि ।

उदाहरणम् - मिदेर्गुण: (7.3.82) । अत्र गुणशब्द: उच्चारित: । मिदधातो: गुणविद्दानम् अभीष्टम् ? कुत्र गुणोभवेत् ? अत्र सष्टो निर्देश: नास्ति । तत्समाधानार्थम अत्र व्यवस्था भवति । म्, इ, द् - अत्र गुणविद्दानार्थम् इक: इत षष्ठ्यन्त पदम् उनेन सुत्रेण उपस्थितं भवति । तेन सुत्रस्य अर्थ: मिदे: इक: गुण: । अदेङ्गुण: (1.1.2) इत्यनेन अ, ए, ओ इति एष, गुणस्थानीयस्य कस्य वर्णस्य अदिश: भवेत् । इ-ए अनयो: स्थान (तह) सभ्यात् एकारादेश: भवति । मिद् + तिप् = मिद् + रयन् + तिप् (दिवादिभ्य: श्यन् 3.1.69)= मिद् + य + ति = मिद: 'इ' कारस्थाने गुणो भवति । पेचति इति रुपं सिद्धम् ।

मृजेवृद्धिः (7.2.114) अत्र वृद्धि शब्दः उच्चारितः । म्, ऋ, ज् । इत्यत्र कुत्र वृद्धिः इति जिज्ञासायाम् मृजेः इकः वृद्धिः इति जिज्ञासायाम् मृजेः इकः वृद्धिः इति 'इकः' पदम् उपस्थितं भवति । तेन 'ऋ' इत्यस्य स्थाने वृद्धिः । 'वृद्धिरादैच्' (1.1.1) इत्यनेन आ, ऐ, औ इति वृद्धिवर्णाः । अत्र उरण्रयरः (1.1.51) इति रपरकः 'आ' भवति । तेन 'आर्' इति भवति । मृज् + तिप् = मार्ज् + तिप् = मार्ष् + तिप् व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छां षः (8.2.36) इत्यनेत षः = मर्ष + ति = मार्ष्टि (ष्टुना ष्टुः, (8.4.41) इत्यनेन प्र्तस्थाने टः)

गुणवृद्धिशब्दाश्यां गुणवृद्धिविधानस्थले 'इकः' इति पदम् उपस्थितं भवति इकः स्थाने गुणः वृद्धिः वा भवति । यत्र गुणवृद्धिशब्योः उल्लेखः अस्ति, अथच गुणवृद्धिविद्यान न अभीष्टम्, तत्र 'इकः' इति पदमन् न उयति्ठते ।

अतो गुणे (6.1.97) इति सुत्रे गुणशब्दः उच्चारित। तत्र गुरकार्यं न इष्टम् । उतः तत्र 'इकः' इन्यस्य प्रयोगः न अपेक्षितः । वृद्धियस्यिाचामादिस्तद् वृद्धम् (1.1.73) इत्यत्र वृद्धिशब्देन वृद्धिकार्यं ने भवति । अत्रपि 'इकः' इति न संगच्छते । कुत्रचित् सुत्रे गुणशब्दः साक्षात् न उच्चारितः, यदि तत्र गुणवर्णः प्रयुक्तः, तत्रपि 'इकः' न योज्यते । यथा- त्यदादीनामः (7.2.102) अत्र गुणवर्णः 'अः' अस्ति । यतः अत्र गुणशब्दस्य उचचारणं नास्ति, अन्त्यस्य अस्य 'अ' इत्यादेशः भवति । 'सः' यः आदि रुपं भवति । तथैव वृद्धिवर्णस्य प्रयोगेऽपि वृद्धिवर्णस्य उचचारणाभावे न 'सकः' इति संगच्छते । यथा - दिव औत् (7.1.84)- अत्र वृद्धिवर्णः औकारः अस्ति । वृद्धिवर्णस्य उच्चारणाभावात् 'इकः' इति न संगतं भवति । अलोऽन्त्यस्य (1.1.52) इत्यनेन अन्त्यस्य अलः स्थाने औत्-आदेशः इकोयगचि इति यणादेशः, ततः 'सु', ततः द्यौः इति रुपं सिद्धम् ।

**सि.कौ. (35) अचश्च (1.2.28)-**

ह्रस्वदीर्घप्लुर्तशब्दै र्यत्राज् विधीयते तत्र 'अचः' षष्ठ्यन्तं पदमुपतिष्ठते ।

**व्याख्या**- अचः + च । ऊकालोऽच् (1.2.27) इति सुत्रात् 'ह्रस्वदीर्घप्लुत' तथा 'अच' इति अनुवृत्तिः । ह्रस्वदीर्घप्लुतानाम् उच्चारणेन यत्र 'अचः' विधानं भवति तत्र 'अचः' इति पदं संयोज्य अर्थः विधोयते । अच वर्णस्य हि ह्रस्वः दीर्घः प्लुतः वा विधीयते ।

**ह्रस्वः -** ह्रस्वो नपुंसके प्रातिपदिकस्य (1.2.47)। अस्मिन् सुत्रे ह्रस्वशब्दः अच्चारितः । अत 'अचः' इति पतम् उपस्थितं भवति । सुत्रार्थः । नपुंसके लिङ्गे कार्ये प्रातिपदिकस्य अचः ह्रस्वः भवति । 'विश्वपा' शब्दस्य नपुंस्के आकारस्य ह्रस्वः भवति । तस्य 'विश्वपम्' इति रुपं भवति । दीर्घः - शमामष्टानां दीर्घः श्यनि (7.3.74)- इति सुत्रे दीर्घस्य उच्चारणं भवति । अत्र 'अचः' इति पदस्य संगत्या सुत्रार्थः भवति - शमाम्

अष्टानाम् अचः दीर्घः । 'श्यन्' प्रत्यये परतः सति ाामादीनाम् अष्टानाम् अचः दीर्घः स्यात् । शम् + तिप् = शाम् + श्यन् + तिप् (दिवादिभ्यः श्यन् 3.1.69) = शाम् +य + ति = शाम्यति इति रुपं भवति ।
प्लुतः - वाक्यस्य टेः प्लुतः उदात्तः (8.2.82)-अत्र प्लुतशब्दः उच्चारितः । अतः 'अचः' इति संगया सुत्रार्थः - वाक्यस्य टेः अचः प्लुतः उदात्तः । उदाहरणम् - आयुष्मान् एधि इन्द्रवर्मन् । अचोऽन्त्यादि टि (1.1.64) इत्यनेन वाक्ये 'इन्द्रवर्मन्' इत्यस्य 'अन्' डि । तत्र अच् - अः । तस्य 'अ' स्य प्लुतः उदात्तः भवति । इन्द्रवर्मन् ।

सुत्रे ह्रस्वदीर्घादिः शब्दः अस्ति किन्तु तत्र अचत्व-विधिः न भवति । तर्हि तत्रः 'अचः' इति पदं न संगतं भवति । यथा - ह्रस्वं लघु, दीर्घंच । एतयोः सुत्रयोः ह्रस्वः दीर्घः च उच्चारितौ । किन्तु तत्र अच्त्वविधिः न भवति । अतः तत्र 'अचः' इति पदं न उपस्थितं भवति । तथैव ह्रस्वदीर्घसंज्ञकाः वर्णाः सन्ति । यदि ह्रस्वदीर्घादि शब्दानाम् उच्चारणं न भवति, तत्र 'अचः' इति न संगतं भवति । यता - दिव उत (6.1.131)। अत्र उकारः ह्रस्ववर्णः । किन्तु 'ह्रस्व' इति शब्दः न उच्चारितः । अतः तत्र अच्त्वविधिः न भवति । अष्टन आविभवतौ (7.2.84) अत्र दीर्घः 'आ' अस्ति किन्तु सुत्रे ह्रस्वदीर्घादिः उच्चारणं नास्ति । अतः तत्र अचः इति न सम्बध्यते ।

---

## UNIT - II

---

**सि.कौ. (36) आद्यन्तौ टकितौ (1.1.46) –**

**टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः ।**

**व्याख्या -** आदि + अन्तौ, टित्, किप्त्र + आदिश्च अन्तश्च आद्यन्तौ । द्वन्द्वः । टश्च कश्च - टकौ । द्वन्द्वः टकौ इतौ ययोः तौ । बहुब्रीहिः । द्वन्द्वान्ते श्रयमाणं पदं प्रत्येकमभिसम्बध्यते - इत्यनेन इत् पदस्य 'ट' इति 'क' इति आभ्यां प्रत्येकं योगः । अतः टित् कित् इति अर्थः भवति । वृत्तौ टित्कितौ इत्युक्तम् । 'ट्' इत् यस्य स टित् । क् इत् यस्य स कित् । यस्य टित् । कित् इति आगमौ स्तः तस्य यथाक्रमम् आद्यवयवः अन्तावयवः च स्तः । अर्थात् टित् अधिवयवः, कित् अन्तावयवः । एवं यथाक्रमां सम्बन्धः केन न्यायोन भवति ? यथासंख्यन्यायेन । यथासंख्यमनुदेशः समानाम् (1.3.10) (समानां समसंख्यानां समपतिपठितानामुत्तेशिनामनुदेशिनां च यथाक्रममुद्देशिभि रनुदेशिनः सम्बध्यन्ते ।) अतः यथाक्रमं टित् अधिवयवः, कित् अन्तावयवः च स्तः । क्रमिकाणां क्रमेण अन्वयः । एतादृशः द्वन्दसमासः शास्त्रीयः ।

टितः उदाहरणम् - ह्रस्वनद्यापो नुट् (7.1.54) - ह्रस्वान्तात् नद्यन्तात् आबन्तात् च उत्तरस्य आमः नुडागमः भवति । ह्रस्वान्तस्य आमि नुमागमः यथा - नर + आम् (षष्ठीबहुवचने) । शत्रुवदादेशः मित्रवदागमः इति न्ययेन आगमः न हानिं करोति । नुट् टित् । अतः आमः आद्यवयवः भवति । नर + नुट् + आम् = नराणाम्

(नायि - 6.3.33. पुर्वस्य अजन्नस्य अङ्गस्य दीर्घः स्यात् नामि परतः) । नदी- कुमारी + आम् = कमारी + नुट् + आम् =कुमारीणाम् । युस्तयाख्यौ नदी, 1.4.13, ईकारान्तः ऊकरान्तः नित्यस्त्रीलिङ्गः नदीसंज्ञकः । आवन्तः शब्दः - माला + आम् = माला + नुट् + आम् = मालानाम्) अन्यद् उदाहरणम् - भू + ता (लुटि) । लुट् आर्धधातुकप्रत्ययः । भु + इ + ता, आर्धधातुकस्येड वलादेः (8.3.28) इति 'इट्'- आगमः । सार्वधातुकार्धधातुकयोः इति गुणः अवादेशः, ततः भविता इति रुयं सिद्धम् ।

कितः उदाहरणम् - प्राङ् + षष्ठः, सुगण् + पष्ठः । ङणोः कुक्टुक्शरि (8.3.28) पदान्तस्य 'ङ' स्य णस्य च यथाक्रमं कुक् टुक् च आगमौ स्तः । यदि तयोः परम् 'शर्' प्रत्याहारस्य वर्णः अस्ति । कुक् टुक् च उभौ कितौ । अतः अन्तावयवौ स्तः । प्राङ् + षष्ठः = प्राङ् + क् (कुक्) + षष्ठः = प्राङ्क् षष्ठः। सुगण्+ षष्ठ = सुगण् + ट् (ट्रिक्) षष्ठः = सुगण्ट्षष्ठः । 'क्' 'ट' इति एतौ इतौ स्तः चेत् तर्हि एवं प्रयोगः भविष्यति । 'ट' 'क' एवं विधिः स्यात् । तत्र 'इत्' नास्ति चेत् एवम् आगमप्रसङ्गः नास्ति । राजन् + ट्ट = राजन् + क + ईय (राज्ञः क च 4.2.140) राजकीयम् । कुरु + चट् + ट (चरेष्टः, 3.2.16) कुरुचरः । एवं प्रयोगस्थले 'कित् टित्' इत्यभावात् अद्यवयवानावयवयोः प्रसङ्गः न भवति ।

**सि.कौ. (37) मिदचोऽन्त्यात् परः (1.1.47) –**

**'अचः' इति षष्ठ्यन्तम् । अचां मध्ये योऽन्त्यस्तमात् परसास्यैवान्तावयवो मित् स्यात् ।**

**व्याख्या** - मित् + अचः + अन्त्यात्, परः । म् इत् यस्य सः मित् । 'अचः' इत्यस्य अर्थः अचां मध्ये । यतश्च निर्धारणम् (2.3.41) इति निर्धारणे षष्ठी । 'अचः' इत्यत्र यदि पञ्चमी स्यात् अन्त्यात् अचः परः मित् स्यात् । शे मुचादीनाम् (7.1.59) - मुचादीनां नुमागमः भवति शे परतः । अन्यात् अचः इन्यत्र यदि पञ्चमी स्यात् तर्हि 'मुच्' इत्यत्र अन्त्यस्य अचः अभावात नुमागमः न भविष्यति । अत्र सुत्रे अचः-निर्धारणे षष्ठी । चात्यर्थ एकवचनप्रयोगः । अचां मध्ये यः अन्त्यः अच् ततः परं मित् स्यात् । सच मित् शमुद्यस्य अन्त्याग्यवः स्यात् । आद्यान्तौ- - - इति सुत्रात् एकदेशस्य 'अन्त'स्य अनुवृत्तिः ।

उदाहरणम् - मनांसि । 'मनस्' - शब्दात् नयुंसकस्य झलचः (7.1.72) इति नुमागमः भविष्यति । कुत्र नुम् स्यात् ? मनस् + जस् = मनस् + शि (जसशसोः शि, 7.1.20 इत्यनेन (शि-आदेशः) मनस् इ (लशक्वतद्धिते; 1.4.48 इति 'श' इत) = मनस् + नुम् + इ (नयुंसंकस्य झलचः, इति नुमागमः), 'मनस्' इत्यस्य अन्त्यः अच् 'न' स्थितः अः । तस्मात् नुमागमः अविष्यति । नुम् + स् + इ = सनन् + स्+ इ = मनन् + सि । शि सर्वनामस्यानम् (1.1.42) इति 'शि' सर्वनामस्थानं भवति । सर्वनामस्थाने चासम्बुद्धौ (6.4.8) इति उयधादीर्घः । ततः मनान् + सि । नश्चापदान्तस्य झलि (झलि परे उयदान्तस्य नस्य मस्य अनुस्वारः इति 'नस्य' अनुस्वारः । ततः मनांसि इति रुपं सिद्धम् । अन्यत् उदाहरणम् - इदितोनुम् धातोः (7.1.58) यस्य धातोः ह्रस्वः इकारः इत्, स धातुः इदित् धातुः । तस्मात् नुमागभः भविष्यति ।

यथा - टुनदि इदित् धातु: । इदित् । अत: नद् इति अवशिष्ट: । नद् सत्यत: नुमागम: भविष्यति । नद् + अ + ति = न + नुम् + द् + अ + ति । मिदचोऽन्त्यात्- - इति 'न' इत्यत: परम् अकारात् परं नुमागम: र्शतष्यते । न + न् +द् +अ + ति = नन्दति इति रुपं सिद्धम् ।

**इदं सुत्रं षष्ठी स्थानेयोगा (1.1.49),**

परश्च (3.1.2) इत्यनयो: बाधकम् । अस्मिन् शूत्रे 'अच:' इति षष्ठी स्थानेयोगा यदि गृह्यते, तर्हि वनानि, कुण्डानि इत्यादि रुपं सिद्धं न भविष्यति । तथैव 'प्रत्यय:' 'परश्च' इति प्रत्यय:य पर: प्रयोग: भवति । रुधादिभ्य: श्नम् (3.1.78) इति रुधादे: धातो: श्नम्प्रत्यय: भवति । 'परश्च' इति 'श्नम्' यदा पर: भवति, तद्दा रुध् + श्नम् = 'रुदन' इति स्यात् । तस्य बाधकं मिदयो … इति सुत्रम् । अत: 'रुध्' इत्यत्र रेफस्य परस्मात् उकारात् श्नम् भवति । रुध् + तिप् = रुध् + श्नम् + ति = रु + न + ध् + ति = रुणद्धि इति रुपं भवति ।

'मस्ज्' इति धातो: नुमागमस्थले व्यतिक्रम: भवति । मस्ज् + ता (तृच्) । मस्जिनशोर्झलि (7.1.60) इत्यनेन नुमागभ: । मसन्ज् + ता । स्को: संयोगाद्योरन्ते च (8.2.29) इति 'स' लोप: । मन्ज् + ता । नश्चापदान्तस्य झलि (8.3.24) इति नस्य अनुस्वार: । मंज् + ता । स्वरिच (8.4.55) इति 'जस्य' चर्त्वम् अर्थात् 'च:' । मंच् + ता । चो:कु: (8.2.30) इति चस्य क: । मंक्ता । अनुस्वारस्य ययि परसवर्ण: (8.4.58) मङ्क्ता ।

**सि.कौ. (38) षष्ठी स्थानेयोगा (1.1.49) –**
**अनिधार्रितसम्बन्धविशेषा षष्ठी स्थानेयोगा बोध्या । स्थानं च प्रसङ्ग: ।**

**व्याख्या** - षष्ठी स्थानेयोगा। पदद्वयम्। स्थानेन योग: यस्या: सा स्थामेयोगा। व्यधिकरणबहुव्रीहि:। अथवा स्थाने योग: यस्या: सा स्तानेयोगा। नियातनात् सप्तम्या: अलुक्। षष्ठी - अनिर्धारितसम्बन्धविशेषा षष्ठी। न निर्धारित: (निश्चव:) अनिर्धारित: - नञ् तत्पुरुष:। अनिर्धारित: सम्बन्धविशेष: (सम्बन्धविशेषरूपोऽर्थ:) यस्या: सा - अनिर्धारितसम्बन्धविशेषा- बहुब्रीहि:। साधारणत: सम्बन्धे षष्ठी भवति। यत्र षष्ठी कम् अपि सम्बन्धविशेषं न बोधयति तत् षष्ठी स्थानेयोगा षष्ठी इति ग्रहणं करणीयम्। सम्बन्धा: बहुविधा: यथा - सादृश्यम्, प्रत्यासत्ति:, स्थान्यादेश:, आधाराधेय:, आनन्तर्यम्, विकार:, स्वस्वामिभाव: इत्यादय: शतं सम्बन्धा: भवेयु:। एवं सम्बन्धविशेषेषु यदि कोऽपि सम्बन्ध: न भवेत्। स्थाने + अयोगा - स्थानेयोगा एवं पदच्छेद: कर्तुं शक्यते। आयोगा अर्थात् यत्र अनिर्धारितसम्बन्ध विशेषा षष्ठी सा "स्थाने" अर्थात् स्थानषष्ठी भवति।

उदाहरणम् - इको यणचि (६.१.७७) - “इक:” षष्ठयन्तं पदम्। “इक्” इत्यनेन सह “यण्” इत्यस्य सम्बन्ध: न निर्धारित:। अस्मिन् स्थले “स्थानेयोगा षष्ठी” इति नियमेन अर्थ: स्पष्ट: भविष्यति। इक: स्थाने यण् स्याद् अचि संहितायां विषये। इक् - वर्णस्य स्थाने यण् वर्णादेश: स्यात्। एवम् अर्थे सति प्रयोग: अभ्रान्त: भवेत्। नदी + अम्बु = नद् + य् + अम्बु = नद्यम्बु इति रुपं सिद्धम्।

अन्यद् उदाहरणम् - एच इग् ह्रस्वादेशे (१.१.४०) - ह्रस्वादेशे सति एच: इक् - आदेश: भविष्यति। “एच:” - षठ्यन्नं पदम्। अत सम्बन्ध: अनिर्धारित:। अत: “स्थाने” इत्यस्य योग: भविष्यति। एच: स्थाने इक् स्यात्। ह्रस्वो नपुंसके प्रातिपादिकस्य (१.२.४७) इत्यनेन नपुंसकलिङ्गे प्रातिपदिकस्य ह्रस्व: भवेत्। कस्य ह्रस्व:? एच: ह्रस्व:। गो: समीपम् - अव्ययीभावे समासे अव्ययीभाव: नपुंसकं स्यात्। उपगो इत्यत्र ओकारस्य ह्रस्वादेश:। “एच: इक् ह्रस्वादेशे” इति ाेकारस्य स्ताने उकारादेश:, तत: “उपगु:” इति रूपं सिद्धम्। अनिर्धारितसम्बन्धविशेषा इत्युक्त्वा यत्र षष्ठी कमपि सम्बन्धविशेषं बोधयति तत्र स्थामेयोगा षष्ठि न प्रवर्त्तते। यथा - ऊदुपधाया गोह: (६.४.८९) (गौह: अङ्गस्य उपाधाया: ऊत् स्यात् अजादौ प्रत्यये परत:) गोह: उपधाया: ऊत्। “गोह:” षष्ठयन्तं पपम्। “गोह” अवयवी “ओ” तस्य उपधा अर्थात् अवयव:। “गोह्” “उपधा” उत्यनयो: अवयवायविसम्बन्ध: निर्धारित:। अत: तत्र स्थानेयोगा षष्ठि न प्रयुज्यते, गोह + अ + तिप् = ऊदुपधाया गोह: इत्यनेन उपधाया: ओकारस्य ऊत् बवति। गूहति इति रूपं सिद्धम्। “स्थान”स्य अर्थ: प्रसङ्ग:। दर्भाणां स्ताने शरै: प्रस्तरितव्यम् - इतियाज्ञिकवाक्यप्रयोगे “स्थानम्” प्रसङ्गार्थे प्रयुक्तम्। दर्भाणां प्रसङ्गे (स्थाने) भू-इत्यादेश: स्यात् आर्ध धातुके प्रत्यये परत:। अस् इति स्थाने भू इत्यादेशेन भविता, भवितुम्, बवितव्यम् इत्यादि - रूपं भविष्यति।

**स.कौ (३९) स्ताने‌ऽन्तरतम: (१.१.५०) –**

**प्रसङ्गे सति सदृशतम आदेश: स्यात्। “यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीय:।”**

व्याख्या - स्थाने अन्तरतम:। पदद्वयम्। स्थाने यस्य च भावेन भावलक्षणम् (२.३.३७) इत्यनेन भावे सप्तमि। अतिशयित: अन्तर: एकस्मिन् स्थाने अनेकादेशप्रसङ्ग: भवेत्, तत्र मूलप्रसङआघेन सह यस्य अतिशयितं सादृश्यं भवति तदा सदृशतम: आदेश: हि भविष्यति। चैत्रसन्देश: मैत्र:” - इति प्रयोगे कस्मिन् धर्मे उभयो: सादृश्यम्? इति जिज्ञासा भवति। स्थानिसदृश: आदेश: भविष्यति एवं कथने सादृश्यनियामक: क:? इति प्रश्न: उदेति। सादृश्यनियामका: चत्वार:

१. स्थानम्, २. अर्थ:, ३. प्रमाणम् (मात्रा), ४. गुण: (बाह्यप्रयत्न:)। अन्तरतम: - अतिशयित: सदृश:। अन्तर + तमप् = अतिशायने तमबिष्ठनौ (५.३.५५)

१. स्तानकृतं सादृश्यम् - दध्यत्र इत्यादि। दधि अत्र - “इको यणचि” इति सूत्रेण इकः स्थाने यणादेशः भवति। इ, उ, ऋ, लृ - इत्येतेषां स्थाने य, व, र, ल एते आदेशाः भवन्ति। कस्य स्थाने कस्य वर्णस्य आदेशः भवति? इति जिज्ञासायां तत्र स्थानगतं सादृश्यं शरणं भवति। इकार-यकारयोः तालु उच्चारणस्तानम्। अतः स्थानसादृश्यात् इकारस्थाने यकारस्य आदेशः भवति। दधि + अत्र = दध् + य् + अत्र = दध्यत्र अकः सवर्णे दीर्घः इति सूत्रेण सवर्णदीर्घः प्राप्नोति। ह्रस्व अकर-दीर्घाऽऽकारयोः स्थानसाम्यम् भवति अर्थात् कण्ठः उच्चारणस्थानम्। अतः अकारस्थाने स्थानसाम्यात् दीर्घ आकार एकादेशः भवति। दण्डाग्रम् इति रूपं सिद्धम्।

२. अर्थकृतं सादृश्यम् - क्रोष्टु, क्रोष्टृ - उभयोठ शब्दयोः अर्थः शृगालः। तृज्वत् क्रोष्टुः (७.१.९५) - क्रोष्टुशब्द - स्तुन् प्रत्ययान्तः संज्ञाशब्दः सर्वनामस्थानेऽसम्बुदौ तृज्वद् भवति। अनेन सूत्रेण क्रोष्टुशब्दस्य स्थाने तदर्थकस्य तृजन्तस्य क्रोष्टशब्दस्य आदेशः भवति अन्यस्य तृजन्तस्य कर्त्रादिः आदेशः न भवति। अतः उकारान्तस्य क्रोष्टुशब्दस्य क्रोष्टा, क्रोष्टारौ क्रोष्टारः इत्यदि रुपं बवति। अत्र स्तानकृतस्य सादृश्यस्य प्रयोगः नैव भवति। अर्थकृतं सादृश्यम् आश्रित्य एवंविधे प्रयोगे समाधानं क्रियते। तस्थमिपां तान्तन्तामः (३.४.१०१) - तस् -यस्-थ–मिपां-ताम्-तम्-त-अम् एते आदेशाः भवन्ति। अत्र आदेशः यथासंख्यन्यायेन न भवति। अर्थकृतसादृश्य वलेन अत्र आदेशः भवति। स्थाने यस्य अर्थस्य बोधकः, आदेशः अपि तदर्थस्य बोधकः स्यात्। प्रथमपुरुष-द्विवचनस्य बोधनिमित्तम् तस् -स्थाने ताम्- आदेशः भवति।

३. गुणकृतं सादृश्यम् - गुणशब्दस्य अर्थः बाह्यप्रयत्नः। यस्य वर्णस्य येन वर्णेन सह गुणगतं (वाह्यप्रयत्नगतं) सादृश्यं स्यात् तस्य वर्णस्य आदेशः भविष्यति। वाक् + हरिः - झयो होऽन्यतरस्याम् (८.४.६२) खयः परस्य हस्य पूर्वसवर्णो वर्णः स्यात्। घोषवतो तादवतो महाप्राणस्य संवृतकण्ठस्य हस्य तादृशो वर्णचतुर्थ एवादेशः स्यात्। वाग्धरिः-वाग्हरिः। हकारस्य बाह्यप्रयत्नाः घोषः संवारः, नादः महाप्राणः च। वर्णचतुर्थस्य “घ”स्य तादृशाः बाह्यप्रयत्नाः। अतः हकारस्थाने घकारादेशः। वाक् + हरिः - वाक्घरिः। झलां जशोऽन्ते (८.२३९) इति क् - स्ताने ग् भवति। वाग् धरिः इति विकल्पेन रुपम्। घकाराभावे वाग् हरिः इति रुपं च एवं द्विविधं रुपं ग्राह्यम्। किन्तुघकारादेशस्थले बाह्यप्रयत्नकृतं सादृश्यम् आश्रीयते।

४. प्रमाणकृतं सादृश्यम् - प्रमाणस्य अर्थः परिमाणं वा मात्रा। उदाहरणम् - अमुम्, अमूभ्याम्, अदस्-शब्दस्य एवं रूपं भवति। अदस् + अम्

अद् + अ + अम् - त्यदादीनामः (७.२.१०२) इति स स्य अ आदेशः।

अद + अम् - अतो गुणे (६.१.९७) इति पररुपः एकादेशः

अमु + अम् - अदसोऽसेर्दादुदो मः (८.२.८०) अदसोऽसान्तस्य दात् परस्य उदतौ स्तः दस्य मश्च। उ इति ह्रस्वदीर्घयोः समाहार द्वन्द्वः। आन्तरतस्यात् ह्रस्वव्यञ्जनयः ह्रस्व; दीर्घस्य दीर्घः। अदम् इत्यस्य अन्ते यदि स् नास्ति, तर्हि दात परस्य ह्रस्वस्य ह्रस्व उकारः, दीर्घवर्णस्य दीर्घ ऊकारः। दकारस्य च मः भवति। अद् इत्यत्र अन्ते सः नास्ति। दात् परस्य ह्रस्वस्य अकारस्य ह्रस्व उकारः भवति। दस्य च मः भवति।

अमुम् - अमि + पूर्वः (६.१.१०७) इति पूर्वः एकादेशः, अस्मिन् उदाहरणे ह्रस्वस्य अकारस्य स्थाने ह्रस्वः उकारः आदेशः भवति।

दीर्घ ऊकार आदेशः यथा -

अमूभ्याम् - अदस् + भ्याम् - अद + अ + भ्याम् (त्यदादीनामः - इति + अः) - अद + भ्याम् (अतो गुणे इति पररुपः एकादेशः।

अदाभ्याम् - सुपि च. ७.३.१०२ इति अतोऽङ्गस्य दीर्घः

अमूभ्याम् - अदसोऽसेर्दादुदो मः इति दात् परस्य दीर्घस्य आकारस्य स्थाने दीर्घ ऊकारः दस्य मश्च। अत्र दीर्घस्य आकारस्य दीर्घ ऊकारः आदेशः।

प्रमाणगतम् आन्तर्यं भवति एवम् - स्थानो वर्णः यन्मात्राविशिष्टः तस्य स्थाने यस्य वर्णस्य आदेशः भविष्यति सोऽपि तन्मात्राविशिष्टः भविष्यति। यथा - अः ह्रस्वः एकमात्राविशिष्टः आदेशः उः अपि ह्रस्वः एकमात्रविशिष्टः। आकारः दीर्घः द्विमात्राविशिष्टः आदेशः ऊकारः अपि दीर्घः द्विमात्राविशिष्टः भविष्यति। सूत्रे "अन्तरतमः" इति तमब् ग्रहणं किमर्थम्? तमबग्रहनं विना अतिशयितं सादृश्यं विनाऽति किञ्चित्सादृश्ये आदेशः भवेत्। तन्निवारणार्थं तमबग्रहणम्। वाक् + हरिः - हकारेण क वर्गस्य वर्णाः कण्ठस्थानहेतोः सादृश्यवन्तः। एवम् एकस्य वर्णस्य स्थाने बहूनां वर्णानामादेशः स्यात्। तेषु यः वर्णः हकारेण सर्वापेक्षया अधिकं सादृश्यं वहति तस्य एव आदेशः भवति। आन्तरतम्यपरीक्षयां बाह्यप्रयत्नाम् उपयोगिता भवति।ह-वर्णः स्थानी। तस्य घोषः, नादः, संवारः, महाप्राणः इति ब्राह्यप्रयत्नाः। हस्य स्थाने कः न भविष्यति। कस्य श्वासः अघोषः, विवारः अल्पप्राणः इति प्रयत्नाः। तस्य साम्यप्रसङ्गे नास्ति। ख स्य महाप्राण इति प्रयत्नसाम्ये सति श्वासः अघोषः, विवारः इति प्रयत्नभेदोऽस्ति। ग स्य घोषः, नादः, संवारः इति प्रयत्नसाम्येऽपि अल्पप्राण इति प्रयत्नभेदः अस्ति। ङ स्य अपि ग स्य इव भेदः अस्ति। क वर्गे ह इत्येनेन सह घ स्य घोषः, नादः, संवारः, महाप्राणः इति चतुर्णाम् अतिशयितं प्रयत्नसाम्यम् अस्ति। अतः ह स्य स्थाने घ इत्यादेशः भवति। अनुदित सवर्णस्य चाऽप्रत्ययः इति सूत्रसआथले बाह्यप्रयत्नानां विवेचनं कृतम्। तत्र स्पष्;मुक्तं यत् सावर्ण्यनिमित्तं बाह्यप्रयत्नाः न आवश्यकाः। आन्तरतम्यपरीक्षायां ते उपयोक्ष्यन्ते इति।

**यत्रानेकविधमान्तर्यं तत्र स्थानतः आन्तर्यं बलीयः -**

इयम् एका परिभाषा। यत्र स्थानार्थगुणप्रमाणेषु एकाधिकं सादृश्यं प्राप्यते। तत्र स्थानकृतम् आन्तयं सादृश्यं बलबत्तरं भवति। स्तानेढ़न्तरतमः इति सूत्रे षष्ठी स्थानेयोगा इति सूत्रात् स्थाने इत्यस्य अनुवृत्तिः भवति। पुनः स्थाने इति ग्रहणेन इयं परिभाषा ज्ञाप्यते यत् यत्र अनेकविधम् आन्तेयं तत्र स्थानत अन्तर्यं बलीयः इति। उदाहरणम् - चेता, स्तोता इत्यादि। चि + ता(तृच्)। आर्धधातुकं शेषः ९३.४.११४) तथा सार्वधातुकार्धधातुकयोः (७.२.८४) इति चि इत्यस्य इ कारस्य गुणः भवति। अदेङ्गुणः (१.१.२) इत्यनेन गुणवर्णः- अ, ए, ओ। इ ह्यस्ववर्णः तत्र प्रमाणतः आन्तर्येण ह्रस्वः अकारः गुणः भवेत्। इ तथा गुणवर्णः ए इत्यनयोः स्थानगतम् आन्तर्यं भवति। इत्युयसानां तालु, एदतौ कण्ठतालु इति इ ए च उभौ वर्णौ तालव्यौ। एवं स्थले इ" अस्य स्थाने गुणवर्णः अ" अथवा ए" बविष्यतिऽ एवं प्रसङ्गे सति शङ्कापरिहारार्थम् उक्तं यत् यत्र अनेकविधकान्तर्यं तत्र स्थानत आन्तेर्यं बलीय इति, इ" स्थाने स्तानसादृश्यहेतोः ए" भवति। चेता इति रुपं सिद्धम्। तथैव स्तु + ता - स्तोता। इत्यत्र उकारस्य स्थाने ओष्ठस्थानीयस्य गुणवर्णस्य ओकारस्य आदेशः, ततः स्तोता इति रुपं सिद्धम्।

अत्रापि प्रश्नः स्ताद् यत् इकारस्य एकाररुपः गुणः भवति, अत्र स्थानसमस्य विवेचने कथम् एतादृशः आदेशः भवेत्? इकारस्सय स्तानं तालु। एकारस्य कण्ठतालु। अत्र अतिशयितं सादृश्यं न संघटते। अत्र एवं प्रयुज्यते यत् यत्र यावतस्थानसाम्यं (सम्पूर्णं स्तानसाम्यं) तत्र सवर्णसंज्ञा अपेक्षिता। यत्र किञ्चित् स्थानसाम्यं तत्र आन्तरतम्यव्यवस्था कर्तुं शक्यते।

**सि.कौ ४० - तस्मिन्निति निर्दिष्टे पूर्वस्य (१.१.६६)**

**सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्।**

व्याख्या - तस्मिन् + इति, निर्दिष्टे सप्तम्यन्तम्, पूर्वस्य षष्ठ्यन्तम्, इति - अव्ययम्। तस्मिन् अधिकरणे सप्तमी। अत्र औपश्लेषिकः आधारः (अभिव्यापकः अथवा वैषयिकः न)। उपश्लेषः सामीप्येन सम्बन्धः। निर् + दिश् + क्त - निर्दिष्टः। निर् नैरन्तर्येण अथवा अव्यवधानेन। दिश्- उच्यचरणक्रिया। निर्दिष्टेः अर्थात् अव्यवधानेन इच्चारितः। यत्र सप्तमी निर्देशेन कार्यं विधीयते। तत्र अव्यवधानेन अच्चारितस्य पूर्वस्य कार्यं भवति। विधीयमानं कार्यम् - क्रियमाणं कार्यम्। तस्मिन् इति - अत्र इति ग्रहणेन तस्मिन् इति पदे शब्दस्वरुपस्य ग्रहणं न भवतिऽ अर्थस्य ग्रहणं भवति। तस्मिन् इति इत्यस्य अर्थः भवति - सप्तमीविभक्तिः। निर्दिष्टः इत्यस्य अर्थः - अव्यवहितरूपेण उच्चारितः। निर्दिष्टे इति पदं तस्मिन् इति पदस्य विशेषणम्।

तस्मिन् निर्दिष्टे इति उभयत्र भावेसप्तमी अथवा सति सप्तमी। एवं ग्रहणेन समस्या भवति। इकोयणचि” इति सूत्रेण सुधी + उपास्य इत्यत्रयण्” भवति। अचि” इति भावे सप्तमी। तर्हि सूत्रस्य अर्थः भवति- एवम् अचि सति इकः स्थाने यण् भविष्यति। अत्र निर्णयः कर्तुं न शक्यते यत् अचि सति अचः अव्यवधानस्थले अथवा व्यवधानस्थले यन् भविषयति। यदि व्यवधाने सतियण् भविष्यति तर्हि समिधम् इत्यत्र इकारात् धकारात् च परम् अकाररुपः अच् अस्ति। एवं सति मकारात् परस्य इकः यण् भवति। एवम् अत्र अनिष्टरुपं भवति।

“सति सप्तमी” स्वीकारे सन्देहस्य निराकरणं न भवति। एवन् अचि सति पूर्वस्य यण् स्यात् अथवा परस्य? पूर्वस्य यणादेशे सुष्ठु भवति। दधि + उदकम् - इत्यत्र धकारात् परस्य इकारस्य अच्त्वं स्वीकृत्य सन्धिः क्रियते चेत् तस्मात् परस्य उकारस्य गुणोऽपि प्राप्नोति। एवं स्थितौ अव्यवहितरुपेण अचि परे यण् भवति। न व्यवहितरुपेण इत्यर्थस्य व्यवस्थानिमित्तम् सूत्रारम्भः। व्यवधानं न भवेत् इति बिधानार्थं सूत्रप्रवृत्तिः। परस्य अव्यबहितपूर्वस्य स्थले हि कार्यं भवति। सुधी + उपास्यः (स् + उ -सु, ध + ई - धी, उ + प् + आस् + य् + अ : - उपास्य) अत्र सु इत्यत्र उकारः इक्, धी इत्यत्र इत्यत्र ईकारः अच् परः, ईकारोऽपि इक्, ई इत्यस्मात् परः उपास्य” इत्यस्य उकारः अच्, तथैव इक्। एवं कुत्र यण् स्यात् इति अनियमः भवति। प्रकृतस्थले नियमविधानार्थं परिभाषा प्रवर्तते। तेन विधानं भवति यत् सप्तमीविभक्त्या निर्दिष्टः यः वर्णः अथवा शब्दः तस्य अव्यवहितपूर्वस्य वर्णस्य स्थाने आदेशः प्राप्नोति।

इको यणचि - अचि परे तदव्यवहितपूर्वस्य इकः स्थाने यणादेशः भवति। सुधी + उपास्यः - उपास्य इत्यस्य उकारः अच् भवति। तस्य अव्यवहितपूर्वस्य धी इत्यस्य ईकार स्थाने यणादेशः भवति। सुध् य + उपास्यः - सुध्युपास्यः। अतः अत्र सप्तमी परसप्तमी बोध्या। एचोऽयवायावः, वान्तो यिप्रत्यये, एङि पररूपम्, झलां जश् झशि इत्यादिसूत्रेषु सप्तम्यन्तपदनिर्देशेन क्रियमाणकार्यस्थले इदं सूत्रम् उपस्थितम् भवति। सप्तम्तन्तपदेन निर्दिष्टस्य अव्यवहित पूर्वस्य एव कार्यं भवति एवं नियमः अत्र स्वीक्रियते।

तस्मिन् शब्दः सप्तम्यन्तस्य अनुकरणं भवति। इति” शब्दः तदर्थं बोधयितुम् उद्दिष्टः। संहितायाम् ” इत्यधिकारे कालकृत अव्यवधानं वर्णान्तरस्य एव भवति। संहिताधिकारबहिर्भुत वीहये कालकृतव्यवधाने आदेशः प्राप्नोति। देवताद्वन्द्वे च (६.३.२५), अग्निश्च विष्णुश्च - अग्नाविष्णु इति द्वन्द्वः। अत्र विग्रहदशायाम् उत्तरपदं गृहीत्वा पूर्वस्य आनङ् आदेशः भवति। ाानङ् आदेशः न संहिताधिकारसम्बद्धः। अतः विग्रहतः वृत्तिदशायां कालगतं व्यवधाने सति आनङ् आदेशः भवति।

अतिशायने तमविष्ठनौ - इति सूत्रे सप्तम्यन्तं पदम् अस्ति। परन्तु अत्र इयं परिभाषा न प्रयुज्यते। सप्तम्यन्तः अतिशायनपदार्थः न शब्दस्तरुपविषयकः। स अर्थस्वरुपविषयकः अतः अव्यवहितोच्चारणम् अत्र गृह्यते।

## Unit - III

**सि.कौ ४१. तस्मादित्यत्तरस्य (१.१.६७)**

**पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम्।**

व्याख्या - तस्मात् + इति + उत्तरस्य। तस्मात् इति पञ्चम्यन्तानुकरणाम्। इति अव्ययम्। उत्तरस्य षष्ठ्यन्तम्। तस्मिन्निितिनिर्दिष्टे - इत्यत: निर्दिष्टे इत्यस्य अनुवृत्ति:। पञ्चम्यन्तपदस्य निदिशेन क्रियमाणं कार्यं वर्णान्तरेण अव्यवहितस्य परस्य स्थाने भवेत्। तस्मात् इति पदम् इतियोगात् पञ्चम्यन्तस्य अनुकरणं भवति। अनुवृत्तस्य निर्दिष्टे इति पदस्य विभक्तिविपरिणामेन पञ्चम्यन्तं भवति। येन सूत्रार्थ:- पञ्चमीविभक्ते: निर्दिशेन विधीयमानं कार्यं तस्य परस्य वर्णस्य भवति। मध्ये अन्यस्य वर्णस्य व्यवधानं न भवति चेत् अस्य सूत्रस्य कार्यं प्रवृत्तं भवति। इदं सूत्रं तस्मिन्निति निदिङष्टे पूर्वस्य इति सूत्रस्य प्रतिरूपकं भवति। तत्र परस्य अव्यवहितपूर्वस्य स्थाने कार्यं भवति। अनेन सूत्रेण अव्यवहितपरस्य स्थाने विधानं भवति।

उदाहरणम् - द्वयन्तरुपसर्गेभ्योऽप ईत् (६.३.९७) द्वयन्तरुपसर्गेभ्य: - अत्र पञ्चम्यन्तनिर्देशेन कार्यविधानं भवति। द्वि, अन्तर, उपसर्ग - एभ्य: परस्य अय: ईत् स्यात्। परस्य कस्य स्थाने ईत् स्यात्? अत्र आदे: परस्य इति परिभाषा सूत्रस्य आवश्यकता अस्ति। परे यद् अस्ति, तस्य आदि वर्णस्य स्ताने आदेश: भवेत्। द्वयो: पार्श्वयो: गता: आप: यस्मिन् इति व्यधिकरणबहुब्रीहि:। द्वि + अप् + द्वि + अप् + अ - ऋक्पूरवधु: पथामानक्षे (५.४.७४) इति समासान्त: अप्रत्यय:। द्वि इत्यस्य परस्य। अप् इत्यस्य ईत् स्यात्, द्वयन्तरूपसर्गेभ्यो...... इति सूत्रेण। आदे: परस्य इति सूत्रेण अप् इत्यस्य आदे: अ स्य स्थाने रुपं भवति। अन्यद् उदाहरणम् - ईदास: (७.२.८३) आस: ईत्। आस् + शानच् , आस् आन (लशक्वताद्धिते इति श् इत् हल न्तत्यम् इति च् इत्)। आस: इति पञ्चमी निर्देशेन अव्यवहितस्य परस्य आन इत्यस्य आ" इति स्थाने ई भवति। आस्+ ईन् - आसीन इति रूपं भवति।

उद: स्थास्तम्भो: पूर्वस्य (८.४.६१) - अत्र उद: पञ्चम्यन्तं पदम्। तेन निर्दिष्टं कार्यं वर्णान्तरेण अव्यवहितस्य उद: परस्य स्थाने भवेत्। इदं परिभाषासूत्रम्। परिभाषा स्वातन्त्येण न किञ्चिद् विधानं करोति। विधिसूत्रेण सह मिलितं सत् नियम्च्व्यवस्थां सुगमं करोति। उद् + स्थानम् - उद: स्थास्तम्भो: पूर्वस्य इति सूत्रेण पूर्वसवर्ण: प्राप्त: भवति। तत्र पञ्चम्यन्तपदस्य निर्देशेन अव्यवहितस्य पदस्य स्थाने अदेश: भवेत्। उद: इति पञ्चम्यन्तं पदम्। तत: परस्य स्था ईत्यस्य पूर्वसवर्ण: भवेत्। तत्र समस्या आपतति। आदे: परस्य इति सूत्रस्य सहाय्येन स्था इत्यस्य आदे: स इत्यस्य पूर्वसवर्ण: भवति। सकारस्थाने पूर्वसवर्ण: थ कार भवति। उद् + स्थानम्, उद्+ थ् + थानम् खरिच (८.४.५५) इति दकारस्य चत्वं भवति अर्थात् दस्य स्थान त भवति। उत् + थ् +

थानम्। उत्थ्थानम्। झरोझरिसवर्णे (८.४.६५) थकारस्य पक्षिको लोपः। तेन उत्थानम् इति रुपम्। लोपाभावपक्षे तु थकारस्य श्रवणम्।

**सि.कौ (४२) अलोऽन्तस्य (१.१.५३) –**

**षष्ठीनिर्दिष्टस्यान्त्यस्याल आदेशः स्यात्।**

व्याख्या - अलः अन्त्य स्य। अलः षष्ठ्यन्तम्। अनत्यस्य षष्ठ्यन्तम्। षष्ठीस्थानेयोगा इत्यतः षष्ठी स्थाने इति पदयोः अनुवृत्तिः, षष्ठ्यन्त पदेन निर्दिष्टं कार्यम् अनत्यस्य अलः स्थाने भवति। अल् प्रत्याहारे सर्वे वर्णाः गृहीताः। अल् शब्दः लक्ष्यरुपेण केवलम् एकस्य वर्णस्य बोधकः भवति। सूत्रे पठितः अल् शब्दः वर्णपर्यायः केनापि सूत्रेण षष्ठीविभक्त्यन्तस्य पदस्य प्रयोगेण कार्यं यदि निर्दिष्टं भवति, तर्हिं तत्र कीदृशः नियमः स्वीक्रियते ? तत् सूत्रं एवं व्यवस्थितं करोति - तस्य शब्दस्य )षष्ठ्यन्तस्य) अन्त्यस्य वर्णस्य स्थाने तस्य शब्दस्य (षठ्यन्तस्य) अन्त्यस्य वर्णस्य स्थाने कार्यं भवति।

उदाय्हरणम् - अतो दीर्घो यञि (७.३.१०१)- अतः अङ्गस्य दीर्घः स्याद् यञादौ सार्वधातुके परे। अतः - अत् इत्यस्य षष्ठ्यन्तं रुपम्। तेन निर्दिष्टं कार्यं दीर्घः। पठ + मि - अङ्गसंज्ञकस्य पठ इत्यस्य। अन्त्यस्य दीर्घः इति विधानम् अस्ति। अत्र अङ्गस्य अन्त्यस्य अलः दीर्घः भवति इति अनियमे नियमव्यवस्था।

त्यदादीनामः (७.२.१०२) - त्यद्, तद्, यद्, एतद्, इदम्, एक, द्वि - एतेषाम् अन्त्यस्य अलः स्ताने अकारः स्याद् विभक्तौ परतः। त्यद् - इत्यादीनाम् अः आदेशः। कुत्र स आदेशः स्यात्? षष्ठीनिर्देशात् अन्त्यस्य अलः स्थाने अः स्यात् - इति अनियमेनियमः। तद् सु तद् इत्यश्य अन्त्यः अल् द। तस्य स्थान अः आदेशः। त + अ + सु - त् + अ + अ + सु - त् + अ + सु (अतोगुणे - ६.१.९७ इति पररुपः एकादेशः) स् + अ + स् (तदौः सः सावनन्त्ययोः ७.१.१०६, त्यदादीनाम् अनन्त्ययोः तस्य दस्य च स आदेशः स्यात् सौ परतः) - सस् - स् इत्यस्य विसर्गादेशे सः इति रुपम् तद् शब्दस्य पुंलिङ्गे प्रथमैकवचने। दिव औत् (७.१.८४) दिव् इति प्रातिपादिकस्य औत् स्यात् सौ परे। दिवः इति षष्ठीनिर्देशः षष्ठीनिदिशेन आन्त्यस्य अलः व् इत्यस्य स्थाने औ आदेशः। दिव् + सु - दि + औत् + सु - दि + औ + सु - द्यौ + स्- द्यौ।

अलोऽन्त्यस्य इति सूत्रे एच इग्घ्रस्वादेशे (१.१.४८) इत्यतः आदेशे इत्यस्य प्रथमान्तेन विभक्तिविपरिणामेन अनुवृत्तिः। केचन आदेशः इत्यध्याहारः इति स्वीकुर्वन्ति। तेन कस्यापि स्थाने अलोऽन्त्यस्य इत्यस्य उपस्थितिः न भवति। आर्धधातुकस्येड् वलादेः (७.२.३५) इत्येनेन यः इडागमः आर्धधातुकस्य अन्त्यस्य

अलः भवेत्। पठ् + तृ - इत्यत्र आर्धधातुक प्रत्ययस्य तृ इत्यस्य ऋकारस्य इडागमः भवेत्। एतेन अनिष्ट रुपं भवेत्। अत्र तृ इत्यस्मात् प्राक् इडादेशः इति इष्टप्रक्रिया। अतः आदेशपदस्य अनुवृत्या अध्याहारेण वा आदेशस्थले अलोऽत्यस्य इति सूत्रस्य प्रवृत्तिः भवति, न आगमस्थले इति निष्कर्षः।

**सि.कौ (४३) ङिच्च (१.१.५३) –**

**अयमप्यन्त्यस्यैव स्यात्। सर्वस्य .... (सू.४५) इत्यस्यापवदिः**

व्याख्या - ङ् इत् च ङ् (ङकार) डत् यस्य सः ङित्, बहुब्रीहिः। प्रथामान्तम्। च इति अव्ययम्। अलोऽन्त्यस्य इत्यतः अलः अन्त्यस्य तथा षषआठि स्थानेयोगा इत्यतः स्थाने इति पदत्रयस्य अनुवृत्तिः, हष्ठी इत्यस्यापि अनुवृत्या सुगमता भविष्यति। षष्ठीनिर्देशेन यः ङिदादेशः सः अन्त्यस्य स्थाने भवति - इति सूत्रस्य वृत्तिः। अयम् अपि - अयं ङिदादेशः अपि अन्त्यस्य अलः स्थाने भवति।

सर्वस्य इत्यस्यापवादः। इदं सूत्रम् अनेकालसिशत् सर्वस्य (१.१.५५) इत्यस्य अपवादः। सूत्रकारः एकवर्णमकस्य अनेकवर्णात्मकस्य च आदेशविषये त्रीणि सूत्राणि उपस्थापयति। अलोऽन्त्यस्य, ङिच्च, अनेकाल् शित् सर्वस्य इति। पूर्वं प्रति परसूत्रं बलवत्तरम्। अलोऽन्त्यस्य (१.१.५२) इति सूत्रापेक्षया ङिच्च (१.१.५३) बलवत्तरम्। उभयापेक्षया अनेका;शित् सर्वस्य (१.१.५५) इति सूत्रं बलवत्तमं स्यात्। सूत्रकारः ङिच्च इति सूत्रं पूर्वम् उपन्यस्तवान् अयवादसूत्ररूपेण। अपवादसूत्रं परसूत्रं बाधते। परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः। पूर्वापेक्षया परसूत्रम्, परापेक्षया नित्यसूत्रम्, नित्यापेक्षया परसूत्रं, परापेक्षया नित्यसूत्रम्, नित्यापेक्षया अन्तरङ्गं सूत्रम्, अन्तरङ्गपेक्षया अपबादसूत्रम् एवम् क्रमेण उत्तरोत्तरं बलवत्तरम्। अपोचते वाध्यते अनेन इति अपवादः। येन नाप्राप्ते यो विधिरारभ्यते स तस्यापवादः। एकेन विधिना अवश्यं प्राप्ते सति तस्य लक्ष्यस्य साधनाय यः अन्यः विधिः आरभ्यते स पूर्वविधेः अपवादः। नाप्राप्ते इत्य न (नञ्) द्वयम्। न + अप्राप्ते - न + न + प्राप्ते। न प्राप्तः अप्राप्तः इति नञ्च समासः तस्मिन् अप्राप्ते। न प्राप्ते - नाप्राप्ते। सम्भाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधौ वाच्यौ। Two negatives make strong affirmative. नद्वयेन विधेः बलबता अत्यधिकं भवति। न अप्राप्ते अर्थात् अवश्यम्प्राप्ते यो विधीः आरभ्यते स तस्य विधेः बलवद् बाधकः अपवादः भवति। अपवादः पूर्वं पूर्वं विधिं प्रति सर्वापेक्षया बलवत्तरः।

यस्मिन् आदेशे ङं (ङंकारः) इत् स ङित्। अनङ्, अवङ्, इयङ्, उवङ्, - एवम् आदेशः ङित्, ङिच्च इति सूत्रस्य अभिप्रायः भवति यत् षष्ठीविभक्तिनिर्दिष्टः यः ङित् आदेशः सः अन्त्यस्य अलः स्थाने भवति। अन्त्यादेशनिमित्तं पूर्वम् अलोऽन्त्यस्य इति सूत्रमस्ति। ानत्यस्य ाल: स्थाने ङित् आदेशः स्यात् इति पृथग्

विधे: किं प्रयोजनम्? एवं सूत्रक्रमं यदि पश्याम: तत्र पार्थक्यम् अवगम्यते। अलोऽन्त्यस्य इति अस्य अनेकालसित् सर्वस्य परत्वात् बाधकं भवति। ङिच्च इति अन्त्यादेशोऽपि परस्य अनेकालशितसर्वस्य उपबाद: भवति। एवं सूत्रत्रयस्य प्रयोजनं भिन्नम्।

अनेकालशित्सर्वस्य इति सूत्रेण एवं युज्यते यत् यत्र आदेश: अनेकाल् तत्र सर्वस्य स्थाने आदेश: भवति। यदि अनेकाल आदेश: ङित् भवति तर्हि अनत्यस्य वर्णस्य स्थाने भवति। यदि ङित् एकवर्णात्मक: आदेश: तत्र न कापि समस्या। यत्र ङित् आदेश: अनेकाल (अनेकावर्णात्मक:) तत्र अन्त्यस्य वर्णस्य स्थाने आदेश: भवति इति अयं विधि: अनेकालशित् सर्वस्य इत्यस्य अपवाद: भवति। एवं ङित् करणस्य अन्त्याल् स्ताने आदेशिनिमित्तम् एकं प्रयोजनम्।।

ङित: अन्त्यादेशस्य उदाहरणम् - गो + अग्रम् - गवाग्रम्। गो + अग्रम् - अवङ् स्फोटायनस्य (६.१.१२३)इति सूत्रेण अवङ् आदेश:। अलोऽन्त्यस्य इत्यन्त्यादेशप्राप्तौ अत्र अवङ् आदेश: अनेकाल् अर्थात् अनेकवर्णात्मक:। अनेकाल्शितसव७स्य इत्यनेन गो शब्दस्य स्थाने अवङ् आदेश: प्राप्नोति। किन्तु आदेशस्य ङित्कारणात् अन्त्यस्य अल: अर्थात् गो इत्यस्य अन्त्यस्य ओकारस्य स्ताने अवङ् आदेश: भवति। ङिच्च इति अनेकालसूत्रस्य अपबाद: इति बलेन। गो + अग्रम् - ग् + अव + अग्रम् - गवाग्रम्। अनङ् सौ (७.१.९३) ससिशब्दस्य प्रथमैकवचने रुपम् - सखि सु, अनङ् सौ इति अनेकाल् शित् सर्तस्य इति परं बाधित्वा ङिच्च इति अपबादबलेन अन्त्यस्य अल: स्थाने अनङ् आदेश:। सखि + सु - सख् + अन् सु - सखन् + सु सर्वनामस्थाने चासम्बुद्धौ (६.४.८) इति नान्तस्य उपधादीर्घ:। सखान् स - स् इति अपृवतं हल् लुप्यते। न् इति प्रातिपादिकान्तस्य लोप: सखा इति रुपं सिद्धम्।

आनङ्गतो द्वन्द्वे (६.३.२४) - माता च पिता च। चार्थेद्वन्द्व: इति द्वन्द्वसमास:। समासात् कृत्तद्धितसमासाश्च इति प्रातिपादिकसंज्ञा। मातृपितृ। सुयोधातुप्रातिपादिकायो: इति सुब् लुक्। मातृ इत्यस्य ऋकारस्य स्थाने आनङ्ग आदेश:। आदेश: अनेकाल् ङित् च तत: मातापितृ प्रथमाद्विवचने मातापितरौ इति रुपम्।

ङित्करणस्य अन्यत् प्रयोजनं गुणवृद्धिनिषेधादि तत्र ङित्करणस्य न अन्त्यादेश: वस्तुत: सर्वादेश: प्रयोजनपार्थक्यात् ङित् करणस्य। भवतु - भव इति क्षेत्रे लोटि-प्रथमपुरुषैकवचने मध्यमपुरुषैकवचने च आशीर्वादार्थे तातङ् आदेश: न भवति। तु-स्थाने तथा हि-स्थाने सर्वस्य स्थाने तातङ्देश: भवति। तत्र तातङ् इति अस्य ङित्करणस्य प्रयोजनं न अन्त्यादेश:। गुणवृद्धिनिषेधसाम्प्रसारणादि प्रयोजनम्।

तातङ् - ङित्, कङाङ्ति च (१.१.५) इति गुणनिषेधः। स्तताात्, युतात् - उतो वृद्धिर्लुकि हलि (७.३.८९) इति वृद्धिप्राप्तौ तातङः ङित् - करणात् वृद्धिनिषेधः। एवं ङित् बहुप्रयोजनस्थले अनेकाल्शित्सर्वस्य इति सर्वादेशः। केवल अत्यादेशस्थले ङिच्च इति सूत्रप्रवृत्तिः। (द्र. सि. कौ (२१९७) तुह्योस्तातङाशिष्यन्यतरस्याम् ७.१.३५)।

अत्र अनेकाल्त्वात् सर्वादेशः। यद्यपि ङिच्च इत्ययमपवादस्तथाप्यनन्यार्थङित्त्वेष्वनङादिषु चरितार्थ इति गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थतया सम्भवत्प्रयोजनङकारे तातङि मन्थरं प्रवृत्तः परेण बाध्यते। इहोत्सर्गापवादयोरपि समबलत्वात्। (द्र. भा १.१.५३)

**सि.कौ (४४) आदेः परस्य (१.१.५४) –**

**परस्य यद् विहितं तत्स्यादेर्बोध्यम्। अलोऽन्त्यस्य (स.४२) इत्यस्यापवादः।**

व्याख्या - आदेः षष्ठ्यन्ताम्। परस्य -षष्ठ्यन्तम्, षष्ठी स्थानेयोगा इत्यतः षष्ठी अलोऽन्त्यस्य इत्यतः अलः इति द्वयस्य अनुवृत्तिः। परस्य स्थाने विधीयमानं कार्यम्, तस्य आदेः अलः स्ताने स्यात् इति बोध्यम्। अलोऽन्त्यस्य इत्यस्य अपवादः। सूत्रार्थः - षष्ट्यन्तनिर्देशेन परस्य यत् कार्यं भवति, तत् तस्य परस्य आदेः अलः स्थाने भवेत्। उदाहरणम् - उढः स्तानस्तम्भोः पूर्वस्य ( ८.४.६०) उढः उपसर्गात् परयोः स्थास्तम्भोः पूर्वसवर्णाः स्यात्। तस्मादित्युत्तरस्य इति परिभाषासूत्रेण पञ्चम्यन्तनिर्देशेन विधीयमानं कार्यम् अव्यवहितो तस्य स्थाने भवति। पञ्चम्यन्तनिर्दिष्टात् उढः परयोः स्था इत्यस्य स्तम्भ इत्यस्य च पूर्वसवर्णः आदेशः स्यात्। ालोऽन्त्यस्य इति परिभाषासूत्रेण अन्त्यस्य अलः स्थाने अयम् आदेशः प्राप्नोति। किन्तु आदेः परस्य - तस्य अपवादसूत्रम्। तेन परस्य स्था इत्यस्य स्तम्भ इत्यस्य च आदेः सकारस्य स्थाने पूर्वसवर्णः आदेशः भवति। इदं सूत्रं तस्मादित्युत्तरस्य इति सूत्रस्य परिपूरकं भवति। उभयोः समन्वयेन एवं फलितार्थः भवति यत् - तस्मादित्युत्तरस्य इत्यने परस्य यत् कार्यं भवति, तत् परस्य आदेः वर्णस्य स्थाने भवति। नात्र अन्त्यादेशः नवा सर्वादेशः। एवं अलोऽन्त्यस्य अपबादरूपेण परस्य आदेः वर्णस्य स्थाने आदेश विधानार्थं सूत्रस्यास्य प्रवृत्तिः। उढः स्थास्तम्भोः पूर्वस्य इति अस्य प्रक्रिया तस्मादित्युत्तरस्य इत्यत्र द्रष्टव्या। तत्र द्वीप इत्यस्यापि प्रक्रिया दत्ता। द्वयन्तरुपसर्गेभ्योऽपि ईत् - द्वि + अप्, द्वि + अप् + अ, द्वि + ईप् + अ - द्वीप। परस्य यद् विधेयम् तत् तस्य आदेः बोध्यम्। अप इत्यस्य आदेः अ इत्यस्य ई भवति। तेन द्वि + अप - द्वीप इति रुपं भवति। अलोऽन्त्यस्य इत्यस्य अपबादः। नोचेत् अन्त्यस्य अलः स्थाने ईदादेशेन अनिष्ट रुपं स्यात्।

**स.कौ (४५) - अनेकाल्शित्सर्वस्य (१.१.५५) –**

**स्पष्टम्। अलोऽन्त्य सूत्रापवादः। अष्टाभ्य ओश (सू. ३७२) इत्यदौ आदेः परस्य (सू.४४) इत्येदपि परत्वादनेन बाध्यते।**

व्याख्या - अनेक अल् शित् (श इत्) सर्वस्य। न एकः अनेकः नञ्च तत्पुरुषः। अनेक अल् यस्य सः अनेकला बहुब्रीहिः। श् (शकारः) इत् यस्य सः शित्, बहुब्रीहि। अनेकाल् च शित् च अनयोः समाहारः - समाहारद्वन्द्वः। अनेकाशित् यत्र आदेशः अनेकालविशिष्टः अथवा शित् तत्र आदेशः समुदायस्य स्थाने भवेत्। अलोढत्यस्य इत्यस्य अलोऽन्त्य इति एकदेशग्रहणे न दोषः। एवम् आंशिकग्रहणेन लाघवसिद्धिः। एवम् अन्यत्र अपि तथैव दृष्टम्। प्राग्रीश्वरान्निपाताः (१.४.५६) इत्यत्र अधीश्वरे (१.४.९७) - सूत्रस्य रीश्वर ग्रहणमपि कृतम्।

व्याकरणशास्त्रे कुत्र आदेशः एकाल् कुत्र वा अनेकाल्। येन आदेशेन एकवर्णस्य आदेशः सः एकाल। यत्र एकाधिकस्य वर्णस्य आदेशः स अनेकाल्। यत्र आदेशे श् इत् स शित्। कुत्र स्पष्टतया निर्देशः नास्ति यत् आदेशः समुदायस्य स्थाने स्यात्, अथवा अन्त्यस्य वर्णस्य  स्थाने स्यात् । एवंविधस्थले अनियमप्रसङ्गः तत्र नियमविधानार्थं परिभाषासूत्रं सहायकम्। अतः अनेकाल् इति सूत्रं नियमं दर्शयति यत् अनेकाल्विशिषिष्टः आदेशः अथवा आदेशः शित् भवेत् तर्हि स आदेशः सर्वस्य स्थाने भवति। अलोऽत्यस्य, ङिस्य अनेकल्शित्सर्वस्य इति सूत्रत्रयं कस्य स्थाने आदेशः करणीयः, तत् स्पष्टं निर्धारयति।

१. सामान्यतः ाादेशः एकालचेत् अन्त्यस्य अलः स्थाने भवति।

२. ङित् आदेशः एकाल् अथवा अनेकाल् भवति चेत् तर्हि अन्त्यस्य अलः स्थाने हि भवति।

३. व्यितीतः अनेकल् आदेशः अथवा शित् आदेशः भवति चेत् तर्हि समुदायस्य स्थाने भवति।

आदेशस्य एकालत्वविषये तथा अनेकालत्वविषये इदं हयेयं यत् अनुबन्धविनिर्मुक्तपदार्थस्यैवोपस्थितिः अर्थात् अनुबन्ध(इत्वर्ण) तः मुक्तस्य - रहितस्य पदार्थस्य वर्णस्य अथवा वर्णसमुदायस्य लक्ष्ये कार्ये उपस्थितिः। एवं नियमेन यो वर्ण इत्सज्ञकः तस्य लोपं कृत्वा लक्ष्ये कार्यस्थले एकाल् अथवा अनेकाल् इति विवेचनं करणीयम्। नानुबन्धकृतमनेकाल्त्वम् इति परिभाषया आदेशे आगमे वा अनुबन्धकृतम् अनेकाल्त्वं न स्वीक्रियते। अवङ् - आदेशस्थले ङकारस्य इत्संज्ञा लोपः च। तत्र अव इत्यत्र वर्णत्रयम्। तत्र अनेकालत्वं भवति।

अर्वणस्तसावनञः (६.४.१२७) नञा रहितस्य अर्वन् इत्यङ्गस्य तृ इत्यन्तादेशः सात्, न तु सौ। एतेन सूत्रेण तृ आदेशस्य अनेकालत्वे अपि ऋकारस्य इत्वात् केवलं त् शिष्यते। च एकाल। तत्र अनुबन्धकृतम् अनेकालत्वं न गृह्यते।

अनेकाल् इति कारणात् अस्तेर्भुः (२.४.५२) अस्तेः आर्धधातुके परे भूः इत्यदेशः भवति। बभूव, भविता इत्यादि सिद्ध्यति। अत्र समुदायस्य अस् इत्यस्य स्थाने भू-आदेशः भवति।

अतो भिस ऐस् (७.१.९) अकारन्तादङ्गाद् भिस ऐस् स्यात्। अनेकालत्वात् सर्वादेशः। राम + भिस् - राम+ ऐस् - रामैः।

शित्विषयकम् उदाहरणम् - अष्टास्य औश् (७.१.२१) कृताकारदृष्टनः परयोः जस्शसोः औश् स्यात्। वैकल्पिकं चेदष्टन आत्वम्। अष्टाभ्य औश् इत्यादौ आदेः परस्य इत्येतदपि परत्वाद अनेन वाध्यते। अष्टाभ्यः इति पञ्चमीनिर्देशेन अदेः परस्य इत्यनेन परस्य आदिवर्णस्य स्थाने आदेशः स्यात्। किन्तु आदेः परस्य इति सूत्रापेक्षया अनेकालसित् सूत्रं परं बलवत्तरं च। अष्टन् + जस् - चुट् इति ज इत्। अष्टन् आ विभक्तौ (७.२.८४) अष्ट + आ + अस् । अकः सवर्णेदीर्घः - अष्टा अस्। अष्टाभ्य औश् इति शित्वात् सर्वादेशः। अष्टा + औश् - अष्टा + औ - अष्टौ जशशसौः इति षष्ठीनिर्देशेन अलोऽन्त्यस्य इति अन्त्यस्य अलः स्थाने औश् स्यात्। अनेकालशित् इति तस्य अपावादसूत्रम्। शित्वात् समुदायस्य स्ताने ओश् - आदेशः भवति।

अष्टाभ्यः - इति पञ्चमीनिर्देशात् तस्मादित्युत्तस्य आडेः परस्य इति सूत्रद्वयेन परस्य यत् कार्यं तत्तस्य आदिवर्णस्य स्थाने भवेत्। आदेः परस्य (१.१.५४) इत्यतः अनेकाल् सूत्रं(१.१.५५) परं सूत्रम्। विप्रतिषेधे परं कार्यम् इति परसूत्रं वलीयस्त्वात् प्रयुज्यते। अष्टा + औश् - अष्टा + औ। जश्शसौः स्थाने औश् वृद्धिरेचि (६.१.८८) इति वृद्धिः, अष्टौ इति सिद्धम्। आदेःपरस्य अनेकाल् इत्यनयोः विप्रतिषेधः अर्थात् तुल्यवलविरोधः। अन्यत्रान्यत्र लब्धावकाशयोरेकस्मिन् युगपत्प्रवृत्तिस्तुल्यबलविरोधः। एवं स्थले आदेः परस्य उत्यस्य अनेकाल् इत्यस्यापि प्रवृत्तिः भवति। अष्टाभ्य औश् इति स्थले द्वयोः सूत्रयोः तुल्यबलविरोधः। एवं स्थले अनेकल्परं सूत्रम्। तत्र तस्य प्रवृत्तिः। यत्र अनेकालः इति विषयः नास्ति तत्र आदेः परस्य इत्यस्य प्राप्तिः।

# UNIT - IV

**सि.कौ (४६) स्वरितेनाधिकारः (१.३.११)**

स्वरितत्वयुक्तं शब्दस्वरुपमधिकृतं बोध्यम्। परनित्यान्तरङ्गपवादानामुत्तरोत्तरं बलीयः (९.३९) असिद्धं बहिरङ्गमन्तरङ्गे (९.५१) अकृतव्युहाः पाणिनीयाः (९.५७)। निमित्तं विनाशोन्मुखं दृष्टक तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः।

व्याख्या - स्वरितेन अधिकारः। स्वरितेन - तृतीयान्तम्। अधिकारः - प्रथमान्तम्। स्वरितचिह्नेन अथवा स्वरितधर्मेण युक्तं शब्दस्वरुपम् अग्रे अधिकाररुपेण व्याप्तं भवति।

प्रथमपरिभाषा (९.३९) - परम्, नित्यम्, अन्तरङ्गम्, अपवाद - एषु प्रत्येकम् उत्तरोत्तरक्रमेण बलवत्तरम्।

द्वितीयपरिभाषा (९.५१) - अन्तरङ्गस्य कार्यस्थले बहिरङ्गं कार्यम् असिद्धम्।

तृतीयपरिभाषा (९.५७) - पाणिनीयाः अकृतण्युहाः, पाणिनेः शिष्याः तस्य सम्प्रदायस्य वैयाकरणाः विनाशोन्मुखं निमित्तं यदा पश्यन्ति, तत्प्रयुक्तं कार्यं न कुर्वन्ति।

अधिकारः - व्यापृत्तिः व्याप्तरूपेण प्रवृत्तिः पूर्वसूत्रे पठितः शब्द उत्तरसूत्रे उत्तरसूत्रेषु वा व्याप्तः भवति चेत् तस्य अधिकारः भवति। पूर्वास्मात् सूत्रात् उत्तरं सूत्रं प्रति गतिशीलं पदम् अधिकारस्य विषयः। स्वरितेन इति शब्देन स्पष्टं ज्ञायते यत् पाणिनेः अष्टाध्याय्यां सूत्राणि स्वरचिह्नयुक्तानि अथवा स्वरेण उच्चारितानि आसन्। छन्दोवत् सूत्राणि - इति सूत्राणां श्रुतिवत् प्रामाण्यम्। सूत्रेषु स्वरतो वर्णतोऽर्थतो वा व्यतिक्रमः न स्यात् इति हेतोः तत्र स्वरचिह्नानि आसन्। स्वरितेन - इत्थम्भूतलक्षणे (२.३.२१) तृतीया। स्वरितत्वयुक्तं सूत्रम् अधिकारसूत्रम्। पाणिनिना अधिकारसूत्रे स्वरितत्वबोधकं चिह्नं प्रयुक्तम्। सम्प्रति ग्रन्थे स्वरितचिह्नं नास्ति। ात: व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् - इति न्यायेन व्याख्यान बलेन अधिकारः जायते। अधिकारः उत्तरसूत्रेषु स्वप्रभावं सूचयति। अधिकारो नाम विनियोगः। प्रत्ययः (३.१.१), परश्च (३.१.२) एवं सूत्रयोः अधीकारः अष्टाध्यायाः तृतीयाध्यायस्य प्रारम्भात् पञ्चमाध्यायस्य समााप्तिं यावत् प्रवर्त्तते। धातोः (३.१.९१) - अस्य अधिकार तृतीयाध्यायस्य समााप्तिं यावत् भवति। एवम् अङ्गस्य (६.४.१), भस्य(६.४.१२९), पदस्य (८.१.९६), कारके (१.४.२३) अनभिहिते (२.३.१) इत्यादीनां सूत्राणाम् अधिकारः प्रतिज्ञानुसारं परवर्तिषु सूत्रेषु दृश्यते। अधिकारः- अधिक्रियते उत्तरसूत्रव्यापृतत्वेन पठ्यते इति अधिकारः, पूर्वसूत्रस्य अथवा तत्रस्थस्य पदस्य उत्तरसूत्रे उत्तरसूत्रेषु वा अनुवृत्तिः व्यापृत्तिः। स्वदेशे

वाक्यार्थवोधकशून्यत्वे सति परदेशे वाक्यार्थबोधकत्वम् अधिकारावम्। इदं मतम् असमीचीनम्। सूत्रस्य लक्षणे तस्य सार्थकता अस्ति। अत: वाक्यार्थबोधशून्यत्वं न युज्यते।

**अल्पाक्षरमसन्दिग्धं सारवद् विश्वतो मुखम्।**

**अस्तोभमसन्दिग्धं च सूत्रं सूत्रविदो चिश्वतो मुखम्।।**

एवम् अधिकारसूत्राति सूत्रत्वात् सार्थकता अस्ति। अधिकारसूत्रं विधिसूत्रेण अन्वितं सत् स्ववैशिष्ट्यं बोधयति। स्वदेशे लक्ष्यसंस्कारकवाक्यार्थबोधशून्यत्वे सति विधिसूत्रैकवाक्यातापन्नन्वेऽर्थबोधकत्म् अधिकारत्वम्।

भाष्यवचनेन व्याख्यानेन च अधिकारस्य क्षेत्रं वेदितव्यम्। स्वरितत्वयुक्तेन विवियोगेन तस्य गति: कियदव्यापिनी तद् ज्ञातुं न शक्यते। तत्त्वबोधिनीकार: स्वरितेनाधिकार: इत्यत्र भिन्नं पदच्छददं दर्शयति। स्वरिते न अधिकार: इति। स्वरितेन अथवा स्वरितेन एवं द्विविध: पदच्छेद: कर्त्तुं शक्यते। तृतीयया स्वरितत्वयुक्तेन पदेन अधिकार: ज्ञातव्य:।

स्वरिते इति सतम्या स्वरिते सति स्वरितत्वयुक्ते पदे दृष्टे सति न अधिकार: अर्थात् पूर्वाधिकारस्य निवृत्ति:। अधिकारस्य कुत्र प्रवित्ति: कुत्र वा निवृत्ति: तत् प्रतिज्ञागम्यम् अर्थात् आचार्यपरम्परया व्याख्यानत: व्यवहारत: च ज्ञातव्यम्।

**स.कौ. - परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय: (४.३९)**

व्याख्या - इयम् एका परिभाषा। पूर्वापेक्षा परं बलवत्तरम्, परापेक्षयानित्यं बलवत्तरम्, नित्यापेक्षया अन्तरङ्गं बलवत्तरम्, अन्तरङ्गपेक्षया अपबाद: बलबत्तर:। परं च नित्यं च अन्तरङ्गं च अपवाद: च तेषामितरेतरयोगद्वन्द्व:। परनित्यान्तरङ्गापवादा: तेषाम् परनित्यान्तरङ्गापवादानाम्। यतश्च निर्धारणम् इति निर्धारणे षष्ठी। उत्तरोत्तरम् आनुपुर्व्ये द्वे वाच्ये इति वार्तिकेन उत्तर-शब्दस्य द्वित्वम्। कर्मधारयवदुत्तरेषु इति विभक्तिलुक्। उत्तर + उत्तर - गुण:, उत्तरोत्रर। उत्तरोत्तर + सु नपुंसकलिङ्ग सु-स्थाने अम् आदेश:। उत्तरोत्तरा अम्, पूर्वरुप एकादेश:, उत्तरोत्तरम्। बलीय: - इदमनमोरतिशयेन बलवत् - बलशब्दात्, द्विवचनविभज्योपपदे तरबीयसुनौ। इति ईयसुन् (ईयस्)। बल + ईयस् - यस्येति च इति लकारोत्तरस्य अकारस्य लोप:। बलीयस् नपुंसकलिङ्गे रुपम्। पूर्वपरक्रम: अष्टाध्यायीक्रमतो ज्ञायते? एवम् अत्र - एते पक्षा: सम्भवन्ति।

१. पूर्वापेक्षया परसूत्रं बलवत्तरम्।

२. परापेक्षया नित्यशास्त्रं बलवत्तरम्।

३. पेपेक्षया अन्तरङ्गशास्त्रं बलवत्तरम्।

४. परापेक्षया अपवादशास्त्रं बलवत्तरम्।

५. नित्यापेक्षया अन्तरङआगशास्त्रं बलवत्तरम्।

६. नित्यापेक्षया अपवादशास्त्रं बलवत्तरम्।

७. अन्तरङ्गपेक्षया अपवादशास्त्रं बलवत्तरम्।

**पूर्वापेक्षया परशास्त्रं बलीय:**

विप्रतिषेधे परं कार्यम् (१.४.२) इति न्यायेन पूर्वं पूर्वं प्रति उत्तरोत्तरं सूत्रं बलीय:। त्रिपाद्यां यत् शास्त्रं तत्र विप्रतिषेधे ...इति परिभाषा न युज्यते। त्रिपादीं विहाय अन्यत्र परसूत्रापेक्षया पूर्वसूत्रं दुर्बलं भवति। तुल्यबलविरोधे परकार्यं पूर्वापेक्षया बलवत्तरम्। राम + भ्यस् - इत्यत्र सुपि (७.३.१०२) -यञाद्यै सुपि परे अतोऽङ्गस्य दीर्घ: स्यात्। एवमत्र दीर्घ: प्राप्नोति यथ - राम + भ्याम् - रामाभ्याम्। किन्तु अत्र बहुवचने झल्येत् (७.३.१०३) - झलादो बहुवचने सुपि परे अतोऽङ्गस्य एकार: स्यात्। द्वयो: सूत्रयो: अवकाश: प्राप्त:। अष्टाध्यायीक्रमे सुपि च - पूर्वसूत्रम्। वहुवचने झल्येत् - परसूत्रात्। विप्रतिषेधे परं कार्यम् - इति परसूत्रं बलवत्तरम्। तेन एरकार्य: एकारादेश: भवति। रामेभ्य: इति रुपं सिद्धम्।

अन्यत् उदाहरणम् - आदे: परस्य (१.१.५४) अनेकाल्शित् सर्वस्य (१.१.५५) - इति पूर्वपरयो: परसूत्रं बलवत्तरम्। अष्टाभ्य औश् - इत्यत्र-अनेकल्शित्सर्वस्य इति परसूत्रेण जय स्थाने औश् सर्वादेश:। अष्टौ इति रूपं सिद्धम्।

**परापेक्षया नित्यशास्त्रं बलीय: -**

परकार्यापेक्षया नित्यकार्यं बलवत्तरम्। अत्र विकल्पेन कार्यं न कृत्वा नित्येन कार्यं भवेत् अत्र तु कृताकृतप्रसङ्गी नित्य: इति नित्यविधि: स्वीक्रियते। कस्यापि सूत्रस्य प्रयोगात् पूर्वम् अयं विधि: प्रयुज्यते। परस्थितौ अपि अस्यापि सामर्थ्यम् अस्ति। कृते अपि अकृते अपि यस्य विधे: प्रसङ्ग: भवति स नित्यविधि:।

तुद व्यथने (तुद्) इति धातो: लट्लकारे तुद् तिप्। तुददिभ्य: श: (३.१.७७) इति तुधदिगणस्य श" विकरणस्य आगम: भवति। पुगन्तलधूपद्यस्य च (७.३.८६) इति लघूपदगुणोऽपि प्राप्नोति। श इत्यागमापेक्षया गुणविधि: परविधि:। परत्वात् तस्य कार्यं भवेत्। गुणापेक्षया श विधि: नित्य:। गुणात् पूर्वं

गुणात् परं च शविधिः भवेत् एव। गुणे कृते गुणे अकृते अपि श विधिः नित्यः। यतः अयं कृताकृतप्रसङ्गे, श प्रत्ययप्राप्तेः अनन्तरं सार्वधातुकमपित् (१.२.४) श प्रत्ययः सार्वधातुकप्रत्ययः अपित् च। अतएव स ङिद्भावं प्राप्नोति। तेन क्ङिति च (१.१.५) इति गुणनिषेधः। अतः गुणकार्यं न भवति। गुणः कृताकृतप्रङ्गी न भवति। गुणापेक्षया शप्रत्ययः नित्यः। शप्रत्ययः भवति। ततः गुणनिषेधः। तुद् + श + ति - तुद + आ + ति - तुदति इति रूपं सिद्धम्।

**परापेक्षया अन्तरङ्गं बलीयः -**

धातुपसर्गयोः कार्यमन्तरङ्गम्। अन्यत् कार्यं बहिरङ्गम्। अल्पापेक्षमन्तरङ्गम्। बह्वपेक्षं बहिरङ्गम्। पूर्वोपस्थितिनिमित्तकमन्तरङ्गम्। विभक्तिनिरपेक्षतयान्तरङ्गम्। उदाहरणम् - उभये देवमनुष्याः। प्रथमचरमतयाल्पार्धकतिपयनेमाश्च (१.१.३३) - सूत्रेण प्रथम-चरम-तय-प्रत्ययान्त - अल्प - अर्ध- कतिपय नेम - इति शब्दानां परतः जस्विभक्तौ विकल्पेन सर्वनाम्संज्ञा भवति। उबशब्दात् संख्याया अबयवे तयप् (५.२.४५) इति तयप्। उभादुदात्तो नित्यम् (५.२.४४) इति शब्दः निस्पन्नः। उभयशब्दः तयप्रत्ययान्तः। ततः परं जसप्रत्यये प्रथमचरम। इत्यादिसूत्रेण विकल्पेन सर्वनामसंज्ञां प्राप्नोति। पुनः उभयशब्दः सर्वादिगणे पठितः। अतः सर्वादीनि सर्वनामानि (१.१.२७) इति सूत्रेण नित्यविधना सर्वासु विभक्तिषु सर्वनामसंज्ञा भवति। प्रथमचरमः - इत्यादि सूत्रं परसूत्रम्। अतः तेन विकल्पेन सर्वनामसंज्ञा भवेत्। किन्तु प्रथमचरम इत्यादि सूत्रं विभक्तिसापेक्षम् अर्थात् जसविभक्तौ परे सति विकल्पेन सर्वनामसंज्ञां करोति। सर्वादीनि इति सूत्रं विभक्तिनिरपेक्षम् अर्थात् सर्वासु विभक्तिषु नित्येन विधिना सर्वनामसंज्ञाविधानं करोति। विभक्तिनिरपेक्षतया सर्वादीनि - इत्यादि सूत्रम् अन्तरङ्गशास्त्रम्। परनित्यान्तरङ्ग इति परिभाषया परापेक्षया अन्तरङ्गशास्त्रं बलीयः। सर्वादीनि इति सूत्रेण उभय- शब्दस्य नित्येन सर्वनामसंज्ञां भवति। फलतः उभये देवमनुष्याः इति रूपं भवति।

**परापेक्षया अपवादशास्त्रं बलीयः -**

येन नाप्राप्ते यो बिधरारभ्यते तस्यापवादः। एकस्मिन् विद्यौ प्राप्ते तं बाधित्वरा यदि अन्यः विधिः प्रवर्तते स पूर्वस्य अपबादः (वाधकः)। परापेक्षया अपबादः बलीयान्। उदाहरणम् - दध्ना। दधि-शब्दस्य तृतीयैकवचने रुपम्। अस्थिदधिसकथ्यक्ष्णामनङ्गदात्तः (७.१.७५) - अस्थि-दधि-सक्थि- अक्षिप्रभृतीनाम् नपुंसकशब्दानां तृतीयादिषु विभक्तिषु अजादिषु प्रत्ययेषु परेषु अनङ्आदेशः भवति, स च उदात्तसज्ञकः। अनङ् आदेशः ङित्। अतः ङिच्च९१.१.५३) इति अनेन अन्त्यस्य अलः स्ताने आदेशं प्राप्नोति। अनङ अपि अनेकालविशिष्टः। अतः अनेकालशित्सर्वस्य (१.१.१५५) इति सर्वस्यस्थाने आदेशं प्राप्नोति। अनयोः सूत्रयोः अनेकाल्...सूत्रं परसूत्रम्। किन्तु ङिंच्च तस्य अपवादः। अतः अनेकल्सूत्रं वाधित्वा ङिच्च -सूत्रम् अन्त्यस्य अलः स्थाने अनङ् - आदेशं करोति। दधि + टा - दधि + अनङ् + टा - दध् + अन् + आ - दध्+ न् + आ - दध्ना (अल्लोपोऽनः ६.४.१३४) इति अनः अकारलोयः। तथैव दधि-शब्दस्य सप्तम्येकवचने दध्नि इति रुपं भवति।

**नित्यापेक्षया अन्तरङ्गशास्त्रं बलीयः -**

उदाहरणम् - ग्रामणिनी कुले। ग्रामणी + औ। इकोचि विभक्तौ (७.३.७३) नुमागमः अजादौ विभक्तौ परतः। अयं नुमागमः नित्यः। ग्रामणी-शब्दस्य नपुंसकलिङ्गे रूपम् क्रियते। ह्रस्वो नपुंसके प्रातिपादिकस्य ह्रस्वः (१.२.४७) इति प्रातिपादिकस्य ह्रस्वः प्राप्तः भवति। इकोचि ...द्वारा नुमागमः ह्रस्विधिं न अपेक्षते। ह्रस्वे कृते अथवा अकृते नुमविधिं प्रवर्तते। ।तः नुम्विधिः नित्यविधिः। प्रथमम् इकोचि ..इति नुमागम् ह्रस्वो नपुंसके इति ह्रस्वः न भवति। ह्रस्वो नपुंसके ...इत्येनेन नपुंसकलिङ्गे प्रातिपादिकस्य अचः ह्रस्वः भवति। ग्रामणी इति शब्दस्य नुभागमे ग्रामणीन् भवति। तस्य अन्ते अच् नास्ति, न अस्ति। अतः तत्र ह्रस्वविधिं बाधते। वस्तुतः नुम् विधिः नित्यः ह्यस्वविधिः ान्तरङ्गविधिः। नुमागमः अजादिविभक्तिम् अपेक्षते। ह्रस्वविधिः कामपि विभक्तिम् अपेक्षते। ह्रस्वविधिः कामपि विभाक्तिं न अपेक्षते अथात् विभक्तिनिरपेक्षत्वात् ान्तरङ्गविधिः। परनित्यान्तरङ्ग .... इत्यादिपरिभाषया नित्यापेक्षया अन्तरङ्गविधिः बलीयान्। इकोचिविभक्तौ इति नुमागमं वाधित्का ह्रस्वो नपुंसके - इति विधिः अन्तरङ्गत्वात् प्रवर्त्तते। ग्रामणी-इत्यस्य नपुंसके ह्रस्वः भवति। ग्रामणि अत्यतः नुमागमे न कापि समस्या। ग्रामणि + न् (नुम्) - ग्रामणिन्। ग्रामणिन् + शी, नपुंसकाच्च (७.१.१९) इति औ - स्थाने नपुंसकात् शी (ई) प्रत्ययः लशक्वतद्धिते इति शकारः इत्। ततः ग्रामणिनी कुले इति रुपं सिद्धम्। ग्रामणी + औ इत्यस्य नपुंसकलिंङ्गे प्रथमा-द्वितीयाविभक्तयोःद्विवचने ग्रामणिनी - इति रुपम्।

**नित्यापेक्षया अपवादशास्त्रं बलीयः -**

उदाहरणम् - रुणद्धि। रुध् + तिप्। कर्तरि शप् (३.१.६८) इति सार्वधातुके प्रत्यये परे कर्त्तुवाच्ये धातोः शप् प्रत्ययः भवति। अयं नित्यविधिः। अयम् उत्सर्ग (सामान्य) - विधिः। रुधादिभ्यः रनम् (३.१.७८) इति सार्वधातुके प्रत्यये परे कतृवाच्ये रुधादिभ्यः धातुभ्यः श्नम् प्रत्ययः भवति। अयम् कर्तरिशप्" इत्यस्य अपवादः। नित्यापेक्षया अपवादः बलवत्तरः। अतः शप्प्रत्ययं बाधित्वा श्नम् प्रत्ययः भवति। श्नम् मित्। मिद्योऽन्त्यात् परः इति अचंमध्ये अन्त्यात् अचः परे श्नम् आगमः भवति। रुध् तिप् - रु श्नम् ध् ति - रु न ध् ति - रुणद्धि। रुधादिभ्यः श्नम्, रपाभ्यां नो णः समानपदे, इषस्तथोर्धोऽधः, झलां जश् झशि एवं सूत्राणां प्रयोगेण रुणद्धि इति रुपं भवति।

**अन्तरङ्गपेक्षया अपवादशास्त्रं बलीयः -**

उदाहरणम् - दैत्यारिः श्रीशः। देत्यानाम् अरिः श्रियाः ईशः इति विग्रहः। दैत्य + अरिः इति सन्धिस्थले आद्गुणः (६.१.८७) - अवर्णादिचि परे पूर्वपरयोः एकः गुण आदेशः स्यात् संहितायाम् इति गुणादेशं प्राप्नोति। श्री + ईशः -इति स्थले इक्रोणाचि इकः स्ताने यण् स्यादचि संहितायां विषये इति सूत्रेण य् आदेशं

प्राप्नोति। उभयत्र शास्त्रद्वयम् अन्तरङ्गविधि:। परन्तु अक: सवर्णे दीर्घ: (६.१.१०१) अक: सवर्णे अचि परे दीर्घ: एकादेश: स्यात् - इति सूत्रेण आद्गुण:, इकोयणाचि इति सूत्रद्वयं बाधितं भवति। अक: सवर्णे इति सूत्रमपि अन्तरङ्गं सूत्रम्। एवं स्थले त्रयाणां सूत्राणाम् अन्तरङ्गत्वम्। एकस्य कथं प्रवृत्ति: अन्ययो: कथं वा अप्रवृत्ति:। त्रयाणाम् अन्तरङ्गतायां तुल्यबलविरोध:। आद्गुण: इकोयणचि इति सूत्रद्वयापेक्षया अक: सवर्णेदीर्घ: इति परसूत्रम्। परत्वात् बलवत्तरम्। अथवा पूर्वविधिद्वयम् उत्सर्ग (सामान्य) विधि:। उत्सर्गम् अपवाद: बाधते। इति न्यायेन पूर्वयो: अन्तरङ्गसूत्रयो: उत्सर्गविधिरुपेण ग्रहणात् तृतीयस्य परत्वात् अपवादत्वात् च बलवत्तम्। अक: सवर्णेदीर्घ: - अपवादरुपेण बलीयान् अत: तस्य प्रवृत्ति:।

**स.कौ - असिद्धं बहिरङ्गमन्तरङ्गे (९.५१)**

अन्तरङ्गशास्त्रस्य विधानकाले बहिरङ्गंशास्त्रम् असिद्धं स्यात्। उदाहरणम् - पचावेदम्। पचाव इदम् - आद्गुण: (६.१.८७) इत्यनेन सन्धिविधानम्। पचाव, इदम्, इति पृथक्पदद्वयम्। पदद्वयस्य वर्णयो: सन्धिकार्यम् अपेक्षितम्। तद् बहिरुङ्गंशास्त्रम्। सन्धिकरणेन पचावेदम् इति भवति। पचावेदम् - अत्र व कारपरस्थितस्य एकारस्य ऐकारादेश: भवेत् किम्? एत ऐ (३.४.९३) लोडुत्तम्सम्बन्धिन एकारस्य ऐकारादेशो भवति। यथा - करवै, करवावहै इत्यादि। सन्धिकार्येण पचावेदम् इत्यत्र वे स्थितस्य एकार: अन्तावयव: स्यात्। अन्तादिवच्च (६.१.८५) - योऽयमेकादेश: स पूर्वस्यान्तवत् परस्यादिवत् स्यात्। एवं वे इत्यस्य एकार: अन्तावयव: भवेत्। एतै - इत्यनेन ऐकारादेशं प्राप्नुयात्। किन्तु ऐ - इत्यादेश: न भवति। आद्गुण: इत्येन सन्धिकार्यं बहिरङ्गम्। तत्र वर्णद्वयसापेक्षं कार्यम्। वह्वपेक्षम् बहिरङ्गम्। एत ऐ इति कार्यम् एकवर्णसापेक्षम्। केवलम् एकस्य ऐ इत्यादेश: स्यात्। अल्पापेक्षम् केवलम् अन्तरङ्गम्। ऐ इत्यस्य ऐकार्यं अन्यत् किमपि न अपेक्षते। असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषया अन्तरङ्ग शास्त्े प्रवृत्ते बहिरङ्गशास्त्रं असिद्धम्। अर्थात् बहिरङ्गकार्यम् स्थितमपि ाथवा कृतमपि अन्तरङ्गविधाने न कृतमिव भाति। एत ऐ इति अन्तरङ्गविधे: प्रवृत्तिकाले आद्गुण: ईत्यनेन प्रयुक्तं कार्यम् असिद्धवद् भवति। पचाव + इदम् - अ + इ - एकारादेश: असिद्ध: अर्थात् न अभवत् इति ग्रहणीयम्। पचावेदम् - इत्यत्र एकारादेश: असिद्ध: अर्थात् स्थितोऽपि अस्थितवत्। एकार: यदि नास्ति तर्हि ऐकारादेश: कथं स्यात्? ऐकारादेशविधानस्थले यदि एकारादेश: असिद्धवत् तर्हि ऐकारादेश: न भवति। फलत: पचावैदम् इति न भवति। पचाव + इदम् - पचावेदम् इति रुपं सिद्धम्। पच् लोटि उत्तमपुरुषद्विवचने - पचावस् - लोट्लङ्वत् (१.४.८५) इति ङित्। नित्यं ङित: (३.४.९८) इति स (विसर्ग) स्य लोप:। अयं लोप: सिद्ध:। अत: पचाव + इदम् - इत्यत्र सन्धिकार्यं भवति । पचावेदम् इति रूपंसिद्धम् । सूतस् उवाच - ससजुषो रु: (८.२.६६) ,भोभगो अघो अपुर्वस्य योऽशि (८.३.१७) इति रो: य-आदेश: । सुत + य् + उवाच लोप: शाकल्यस्य (८.३.१९) - य लोप: । सूत उवाच । एवं यलोप: असिद्ध: । सूत + उवाच - इति अत्र य लोपस्य असिद्धत्वात् आदगुण: इति गुणादेशं न प्राप्नोति । सूत उवाच इति रुपं सिद्धम्।

**सि.कौ.- अकृतव्यूहाः पाणिनीयाः (९.५७)-**

**निमितं  विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः ।**

व्याख्या- सद् + क्वसु - क् इत्– लशक्वतद्धिते (१.३.८) । सु" इत्यस्य उकारः इम् उपदेशेऽजनुनासिक इत् । सद् +वस् - भाषायां सदवसश्रुवः (३.२.१०८) इत्यनेन  सदः परस्य क्वसुः लिट्सदृशः। लिटिधातोरनभ्यासस्य (६.१.१८) इत्यनेन द्वित्वम् । सद् + सद् + वस् । हलादिः शेषः (७.४.६०) स + सद् + वस् । अत एकहलमध्येऽनादेशादेर्लिटि (६.४.१२०) इति अभ्यासस्य सस्य लोपः । सस्थितस्य अकारस्य एकारादेशः सेद्वस् । ततः वसोः सम्प्रसारणम्  (६.४.१३१) इति वस्वन्तस्य भस्य सम्प्रसारणं भवति इति व" स्य सम्प्रसारणेन  उ" स्यात् । परं तत् न भवति । वस्वेकाजाद्घसाम्  (७.२.६७) - कृतद्विर्वचनानामेकाचां धातूनाम्  अकारान्तानां  घसेश्च वसौ इडागमो भवति । एवम् प्रथमम् इडागमं कृत्वा अनन्तरं शस् प्रत्ययः युज्यते चेत्  तर्हि किं भविष्यति । सेद् + इ + वस् - ततः वसोः सम्प्रसारणम् । सेद् + इ + उस् । तः इकोयणचि इति यणादेशे - सेद्युषः इति अनिष्टरूपस्य  प्रसङ्गः स्यात् । अतएव समाधानार्थम् उक्तम् अकृतव्यूहाः पाणिनीयाः ।

निमित्तस्य विनाशे दृष्टे व्यूहं (वि-विशेषः, उहः - निश्चयः) शास्त्रप्रवृतिविषयकं  विशिष्टं निश्चयं पाणिनीयाः न कुर्वन्ति । अर्थात्  बहिरङ्गशास्त्रेण अन्तरङ्गशास्त्रनियितविनाशस्य  सम्भावना दृश्यते चेत् पाणिमीयाः अन्तरङ्गशास्त्रं न योजयन्ति ।

सेद्वस् - वस्" इत्यस्य आदौ वल्" प्रत्याहारस्य  वर्णः अस्ति । वसः सम्प्रसारणेन  वसः व्- स्थाने उ भवति। येन वस्  वलादिः न  भविष्यति । वस् इत्यस्य व् स्थाने उ- विधानं सम्प्रसारणम् । तेन अन्तरङ्गशास्त्रस्य  इत्विधायक, शास्त्रस्य निम्तिस्य वलादेः विनाशे सति तस्मिन् स्थले अन्तरङ्गशास्त्रेण इत्" इत्यस्य विधानं न भविष्यति । सेद + वस् + शस् - इत्यत्र वसोः सम्प्रसारणम्  इत्यनेन व्" स्थाने उ इति भवेत्  । सेद + उष् + अस् – सेदुषः (इण्कोः८.३.५७, अदेशप्रत्यययोः (८.३.५९)इत्याभ्यां  षत्वम् ।

एवम् इष्टरुपसिद्ध्यर्थम्  उक्तम् निमितं विनाशोन्मुस्वमित्यादि । विनाशस्य  उन्मुखम् विनाशोन्मुखम्। निमितं यदा विनाशमुखं गच्छति तत्प्रयुक्तं तन्निमितकं कार्यं न कुर्वन्ति । अथवा व्यूहयते निरस्यते परबलम् अनेन इति व्यूहः । परबलविनाशकः सेनासमूहः। स इव आचरति परबलनिराकरणेन  इति व्यूहः अन्तरङ्गशास्त्रम्। पाणिनीयाः निमित्तविनाशं  पश्यन्ति चेत् अन्तरङ्गशास्त्रम्  न कुर्वन्ति । न कृतो व्यूहो यैः ते अकृतव्यूहाः निमित्तकारणस्य  कुम्भकारादेः विनाशे सति घटादिरुपस्य कार्यस्य स्थितिरुपं  विशिष्टं तर्कं  ये कुर्वन्ति ते

पाणिनीयाः। ते कारणनाशे कार्यनाशः इति स्वीकुर्वन्ति। सेदवस् इत्यत्र सम्प्रसारणे कृते वलादिरुपस्य कारणस्य नाशः भवति। तत्प्रयुक्तस्य इतरुपस्य कार्यस्य च नाशः भवति । अतः सेदुषः इति रुपं सिद्धम् ।

समर्थानां प्रथमाद् वा (८.१.८२) इत्यत्र समर्थपदे सन्धिकरणात् पूवोक्ता परिभाषा ज्ञापिता । अस्मात् सूत्रात् ज्ञायते यत् सन्धिकार्येण सम्पन्नात् प्रातिपदिकात् तद्धितप्रत्येयः भवति ।,सुउत्थित, - इत्यस्मात् अतइञ् (४.१.९५) इति तद्धितः इञ् - प्रत्ययः न युक्तः भविष्यति । सन्धिविधानात् दीर्घविधानात् ,सूत्थित, इत्यस्मात् तद्धितः प्रत्ययः युक्तः भविष्यति । सन्धिं विना (सु + उत्थित, इत्यस्मात् इञ् प्रत्यये तद्धितेष्वचामादेः (७.२.११७) इति अनेन आदिवृद्धया सौ + उत्थित + इ - सावुत्थितिः इति अनिष्टं रुपं भवेत् । सम + अर्थ - समर्थ- एवं सन्धिविधानात् परं प्रयोगः भवति । अतः आदौ सन्धिः, ततः तद्धितप्रयोगः स्थात् इदं ज्ञाप्यते । सु + उत्थित - इत्यत्र आदौ उकारस्य वृद्धिः भवति चेत् उ" इत्यस्य दीर्घः न भविष्यति। सु" इत्यस्य दीर्घस्य निमितस्य उ" इत्यस्य विनाशे पुनः दीर्घकार्यं न भविष्यति। तथैव, सेदुषः इत्यत्र, इट्, इत्यस्य निमित्तस्य वलादेः सम्प्रसारणेन विनाशे पुनः इट् न भविष्यति।

तत्र व्याकरणशास्त्रे बहुविधाः परिभाषाः सन्ति । त्याससिद्धा, ज्ञापकसिद्धा, वाचनिकी च परिभाषाः सन्ति । अस्मिन् प्रकरणे सर्वाः न गृहीताः। प्रायः सन्ध्युपयोगिनीनां परिभाषाणां विवेचनं कृतम्।

***-इति परिभाषाप्रकरणम् -***

**सहायकग्रन्थसूची -**


सिद्धान्तकौमुदी - गोपालदत्तपाण्डेय, चौखम्बा, २००४

सिद्दान्तकौमुदी - गोपालकृष्णदाश, कादम्बिनीदाश;, ए.के.मिशआर, कटक, २०१६

वैयाकरणसिद्दान्तकौमुदी -१ - गोविन्दाचार्य, चौखम्बा सुरभारतीप्रकाशन, वाराणसी, २०१७

व्याकरणदर्पण - Odisha State Bureauof Text Book Preparation and Production, Bhubaneswar, 2013

पाणिनीयव्याकरणस्य भाषावैज्ञानिकाध्ययनम् -शशिभूषणमिश्र,The Banaras Mereantile co, Kolkota, 2012

व्याकरणशास्त्रोतिहासः - लोकमणिदंहाल, भारतीयविद्याप्रकाशनम्, दिल्ली, २००७

## Model Questions आदर्शप्रश्नाः

## Unit - I, II, III & IV

**1. एकेन पदेन / एकेन वाक्येन वा उत्तरं दत्त।** (1 mark each)

क) कुत्र इकः इति षष्ठ्यन्तं पदमुपतिष्ठते ?

ख) कुत्र अचः इति षष्ठ्यन्तं पदमुपतिष्ठते ?

ग) टित् - इत्यस्य कः अर्थः ?

घ) कित् - इत्यस्य कः अर्थः ?

ङ) अनिर्धारितसम्बन्धविशेषा षष्ठी कीदृशी षष्ठी बोध्या ?

च) स्थानम् इत्यस्य कोऽर्थः ?

छ) प्रसङ्गे सति कीदृशः आदेशः स्यात् ?

ज) यत्रानेकविधमान्तर्यं तत्र कीदृशम् आन्तर्यं बलीयः ?

झ) सप्तमीनिर्देशेन विधीयमानं कार्यं कुत्र भवति ?

ञ) पञ्चमीनिर्देशेन क्रियमाणं कार्यं कुत्र भवति ?

ट) षष्ठीनिर्दिष्टे आदेशः कुत्र भवति ?

ठ) अन्तरङ्गे किम् असिद्धम् ?

ड) अन्तरङ्ग किम् ?

**2. सूत्राणां व्याख्यां कुरुत।** (5 marks each)

क) इको गुणवृद्धी, ख) अचश्च, ग) आद्यन्ती टकितौ, घ) मिदचोऽन्त्यात् परः, ङ) तस्मिन्निति निर्दिष्टे पूर्वस्य, घ) तस्यादित्युत्तरस्य, छ) आदेः परस्य, ज) अनेकाल्शित् सर्वस्य।

**3. सोदाहरणं व्याख्यां कुरुत।** (10/15 marks each)

क) यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः

ख) परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः

ग) असिद्धं बहिरङ्गमन्तरङ्गे

घ) अकृतव्यूहाः पाणिनीयाः

ङ) निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्ति।